नं० ५३६८ - घ

ध्यानसंग्रहः (कर्मकाण्डः)

नं० ५३ ११७ - घ

पत्राणि ६१ (संपूर्णम्)

नं० ५३६६ - घ
पूजनसंग्रहः (कर्मकाण्ड:)
पत्राणि ६१ (सम्पूर्णम)
कर्मकाण्ड

5377

I 1 to 2
II 1 to 7
III 1 to 5
IV 1 to 8
V 1 to 5
VI 1 to 22

VII 1 to 5
VIII 1 to 4
IX 1 to 14 but Pages 10 & 11 missing
X 1 to 7
XI 1 to 13

नं. ६६ क
पूजन संग्रहः
६१. पत्र



रा॰ पू॰
१

ॐ देवीं राधां ततो ध्यायेत् शुक्लवर्णां मनोहराम् रत्नालंकारशोभाढ्यां शोभितां पीतवाससा
शारत्पार्वणचंद्रास्यां शारत्पंकजलोचनाम् पक्वबिंबाधरौष्ठीं च स्मेरवक्त्रां मनोहराम् वेणुवी
णाग्रंथिहस्तां भक्तानुग्रहकातराम् रत्नकेयूरवलयरत्नमंजीरशिंजिताम् रत्नकुंडलयुग्मे
न विचित्रेण शुभेन च सूर्यप्रभाछादितेन गण्डस्थलविराजिताम् विभ्रतीं कवरीभारं मालती
माल्यभूषिताम् रूपाधिष्ठात्रदेवीं च गजेन्द्रमंदगामिनीम् गोपीभिः सुप्रियाभिश्च सेवितां
श्वेतचामरैः राजमण्डलमध्यस्थां रत्नसिंहासने स्थिताम् रासे रासेश्वरयुतां राधां रासेश्वरीं भ
जेत् इति ध्यानम् अथ पूजामन्त्राः रत्नसारविकारं च निर्मितं विश्वकर्मणा वरसिंहासनं र
म्यं राधे पूजासु गृह्यताम् अमूल्यरत्नखचितममूल्यं सूक्ष्ममेव च वह्निशुद्धं निर्मलं च आ
सनं देवि गृह्यताम् इत्यासनम् सद्रत्नसारपात्रस्थं सर्वतीर्थोदकं शुभम् पादप्रक्षालना
र्थं च वारि पाद्यं प्रगृह्यताम् इति पाद्यम् पार्थिवद्रव्यसंभूतमतीव सुरभीकृतम् मंगला
र्थं पवित्रं च राधे चार्घ्यं प्रगृह्यताम् इत्यर्घ्यम् पारिजातप्रसूनेच गन्धचन्दनचर्चितम् अ
तीवसौरभरम्यं गृह्यतां परमेश्वरि इत्याचमनम् सुगन्ध्यामलकीचूर्णं सुस्निग्धं सुमनो
हरम् विष्णुतैलसमायुक्तं स्नानीयं देवि गृह्यताम् इति स्नानम् अमूल्यरत्ननिर्माणं केयूर
वलयान्वितम् शंखं सुशोभनं राधे गृह्यतां भूषणं मम इति पादुकादिभूषणं अन्यकारसु

अधलममूल्यरत्नमुज्ज्वलम् रत्नप्रदीपशोभाढ्यं गृह्यतां परमेश्वरि इति दीपम् श्रीखण्डद्र
र्गं सुस्निग्धं कस्तूरीकुङ्कुमान्वितम् सुगन्धियुक्तं देवेशि गृह्यतामनुलेपनम् इति दीपम् वृक्ष
निर्यासः सम्भूतं पार्थिवं द्रव्यसंयुतम् ज्वलदग्निशिखाधूतं धूपं देवि प्रगृह्यताम् इति धूपम्
कालदेशोद्भवं पक्वं फलं च लड्डुकादिकम् परमान्नं च मिष्टान्नं नैवेद्यं देवि गृह्यताम् इति नैवे
द्यम् ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् सर्वभोगादिकं साधु ताम्बूलं प्रतिगृह्यताम्
इति ताम्बूलम् आसनं रत्नपात्रं च स्वखाडसुमनोहरम् मयानिवेदितं भक्त्या गृह्यतां पर
मेश्वरि इति पीठम् रत्नेन्द्रसारनिर्माणं वह्निशुद्धांशुकान्वितम् पुष्पचन्दनगन्धाढ्यं प
र्यङ्कं देवि गृह्यताम् इति पर्यङ्कम् एवं सम्पूज्य देवेशीं दद्यात्पुष्पाञ्जलित्रयम् यत्नेन पू
जयेद्देवीं नायकाष्टावृतेवृतां अथ मूलमन्त्रः ऐं राधायै स्वाहा मूलाक्षरैः षडङ्गन्यासः
पूर्वादिक्रमेण दक्षिणावर्त्तेन मालावत्यै नमः माधव्यै नमः रत्नमालायै नमः सुशीला
यै नमः शशिकलायै नमः पारिजातायै नमः पद्मावत्यै नमः सुन्दर्यै नमः एवं नित्यं पू
जयेद्यो विस्त्रज्ञल्पः समारते जीवन्मुक्तः सुपूज्यश्च गोलोकं याति निश्चितम् परमैश्वर्य
युक्तश्च इह लोके सुपुण्यवान् सर्वपापविनिर्मुक्तो यात्यन्ते विष्णुमन्दिरम् ॥

2

अथ कार्तिकस्यामावास्या दीपावलीति प्रसिद्धा तत्र प्रातरभ्यंगस्नानं कुर्यात् तदुक्तं
कालादर्शे प्रत्यूषे स्वातियुग्दर्शे कृताभ्यंगादिमंगलः भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनि-
वृत्तये अत्रादिपदेन पंचपल्लवोदकस्नानादेरुपसंग्रहः तदुक्तं पुष्करपुराणे स्वातिस्थिते र-
वाविंदुर्यदि स्वातिगतो भवेत् पंचपल्लवोदकस्नायी कृताभ्यंगविधिर्नरः नीराजितो महा-
लक्ष्मीमर्चयन् श्रियमश्नुते भविष्योत्तरेऽपि एवं प्रभातसमये त्वमावास्यां नराधिप स्ना-
नो देवान् पितॄन् सम्यक् संपूज्याथ प्रणम्य चेति नारदेनापि तिथित्रये दीपावलित्वेनाभि-
धानात् तत्र तैले लक्ष्मीरित्यादिमंत्रेणाभ्यंगस्नानमुक्तं एवं च स्वातियुग्दर्शशब्दः प्रत्यूष-
स्वातिप्रकपरः तदुक्तं ब्राह्मे ऊर्जे शुक्लद्वितीयायां तिथिषु स्वातिसंस्थगे मानवो मंग-
स्नायी नैव लक्ष्म्या विमुच्यते इषदर्शे च भूते च कार्तिके प्रथमे दिने यदि स्नानी नराभ्यंग-
स्नानं कुर्याद्दिनोदये कश्यपसंहितायामपि दीपावलिप्रक्रमे प्रोक्तं इंदुक्षयेऽपि संक्रांतौ

रवौ यातिदिनत्रये न तदाभ्यंगो न दोषाय प्रातःपापापनुत्तये अतोऽत्र स्वातियोगं विनाप्य
भ्यंगस्नानमुक्तं मासोपीयं दीपावल्युक्ता दीपैर्नीराजनादत्र सैषा दीपावली स्मृतेति अ
थादित्यपुराणोक्तं दीपावल्यमाहात्म्यं सनत्कुमार उवाच अमावस्यान्तु देवेश कार्तिके मा
सि केशवात् अभ्यंगं प्रयतः स्नात्वा सर्वतीर्थोदकाम्बुषु लक्ष्मीं देवं समभ्यर्च्य कामांस्सर्वान्समा
प्नुयात् अपरेऽह्नि विधिवत्कार्या मनुष्यैः सर्वसम्मिका दिवा तत्र न भोक्तव्यमृते बालातुराज्जना
त् प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमं दीपवृक्षास्तथा कार्याः शक्त्या देवगृहेषु च
चत्वरेषु श्मशाने च। नदीपर्वतसानुषु वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च वस्त्रैः पुष्पैः
र्भूषितव्याः क्रयविक्रयभूमिकाः दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरं ब्राह्मणान्भोजयि
त्वा तु संभोज्य च बुभुक्षितान् अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना स्निग्धैः स्वाद्यैर्विदग्धै
र्बान्धवैर्निर्वृतैः सहेति भविष्योत्तरेषु वत्सरं शीक्ष्नुतममभिधायामावस्याकृत्यमुक्तं एवं।

दी. प्रभातसमये ह्यमावास्यां नराधिप स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च कृत्वा तु पार्व
प. णं श्राद्धं दधिक्षीरघृतादिभिः भक्ष्यैर्नानाविधैः सम्यग्भोजयित्वा तमापयेत् ततोऽपराह्णसम
२ ये घोषयेन्नगरे नृपः अद्य राज्यं बलेर्लोका यथेष्टं चेष्टतामिति लोकश्चापि गृहे रम्ये हृष्टः सुधाधव
लिताजिरे कृतवंदनमालाभिरलंकृतगृहे शुभे तथा पानरसोद्रिक्तनरनारीमनोहरे नृसवा
2 दिव्रसंघुष्टप्रज्वालितप्रदीपके अन्योन्यप्रीतिसंहृष्टदत्ततालकरं जने ताम्बूलहृष्टवदने कुं।
कुमक्षोदचर्चिते दुकूलपट्टनेपथ्यस्वर्णमाणिक्यभूषिते अद्भुतालंकारश्रृंगारप्रदर्शितकौ।
तूहले युवतीजनसंकीर्णे चतुर्ज्वलविहारिणि दीपमालाकुलेरम्ये विद्युल्लसद्धनवंधने प्र
दोषैदोषरहिते शस्ते वंदिजनैर्युते यात्राविहारसंचारजयजीवेतिवादिभिः नष्टोपसर्गरहि
ते राजचौरभयोज्झिते मित्रस्वजनसंबंधिसत्कृत्येमाभिरंभिते ततोऽर्धरात्रसमये स्वयं राजा व्र
वीक्ष्यं अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः महातालध्वनिघोषेण ज्वलद्दीहस्तदीपकैः

सहर्षो यानसंपश्यन्त्वनरतः स्वकैर्नरः । तेहृष्टामहृदाश्चर्यमस्ति चैवात्मनः शुभं । बलिराज्य
प्रमोदं वनतः स्वगृहमाव्रजेत् । एवं गते निशीथे तु जने निद्रायलोचने । तावन्नगरनारीभिः
शूर्पडिंडिमवादनैः । निष्क्राम्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणादिति । कृतरत्नावल्यां तु
तृतीयडिंडिमैरिति पाठः । अस्यामेव रात्रौ कौमुदीमहोत्सव इति निर्णयामृते हेमाद्रौ तु वत्स
देशीमारभ्य प्रतिपदंतं कौमुदीव्रतमुक्तं कौमुदीशब्दस्तु मनिरपि स्वयंकृतवान् कौ मोदन्ते जना
यस्यां नानाभावैः परस्परं हृष्टास्तुष्टाः सुखापन्नास्तेनेयं कौमुदी स्मृतेति । अत्रैव वह्निपुराणे
पंचदिनसाध्यमपि कौमुदीव्रतमुक्तं मैत्रेय उवाच कार्तिकः खलु मासो वै सर्वदेवमयो म
तः । कृष्णपक्षे विशेषेण तत्र पंचदिनानि तु । पुण्यानि तेषु यद्दत्तमक्षयं सर्वकामदं । एकाद
श्यां पौर्दिने दीपप्रज्वालमृषिका मातृखंडहीभेशाध्यपरोगनिमवापसा लब्धकोपि चतुर्द
श्यां स्त्रजयित्वा जनार्दनं निर्भक्तिः परसंगमाविस्त्रलोकं जगाम सः । श्वपाकोपि त्रयोदश्यां दी

दी. ए. ३ पान्दत्वापविक्षुत्तानु वेशपालीलावतीभूत्वाजगामभूपदमत्रयं गोपःकश्चिदमावस्यांशजेज्ञोदृष्ट्वाव
शार्ङ्गिणः मुहूर्तोतःप्रजापालोराजराजेश्वरोभवत् तस्योदीपाःप्रदातव्याराज्ञावत्नमितरवौ श्
हेश्रुतवेगोहेश्वैवेमेघ्यायतनेनव देवानांचैवरथ्यासुप्रमशानेशुमराद्वव नाकेषिनाशुभार्थाय
कार्येपेवदिनाशेव पापिनःपितरोयेवल्नभ्रपिंशेदकक्रियाः वत्तेदेषामभावस्यांपितरःप्राप्नुवे
न्तिते दिवमितिशेषः तत्रश्रीःपूजनीयात्तमत्तुष्ट्यैसुप्रयत्नतः श्रीकामैस्तत्रैतैःसर्वैःक्रीडितव्यंप्र
यत्नतः वेधुभिःसहितैर्यत्नाज्जीतत्त्वमप्रजागरैः योहिहर्षंप्रयातीहतस्यसंवत्सरंजयः द्यूतेतत्क्री
डितेहानिर्विजयःस्याज्जयेध्रुवं स्यात्वेप्रीतिःसुलाभःस्यात्तस्माद्द्यूतंप्रवर्तयेत् गौर्याजितःपुराशंभु
स्तस्माद्द्यूतेविनिर्जितः तेनासौशंकरोडःखीसर्वदासासुखान्विता श्रियासार्द्धंजगद्धात्रिःशेतेवि
स्तुःसुखान्वितः तस्मान्नृत्तैर्जनानांतुप्रेतार्थैःसुखसुप्तिका इतिसुखसुप्तिकाव्रतं तत्रदीपदानं
प्रमावस्याप्रदोषव्यापिनीग्राह्यातस्याकर्मकालत्वात् दिनद्वयेप्रदोषव्याप्तौपरैव द्वैद्वैकारज।

नीयो गोवर्द्धनस्य स्यात्कदाचन तदा विहाय पूर्वेद्युः परेद्युः स्वल्पमपि केति निर्णयतत्त्वेऽस्योक्तिर्नि
र्वपवचनात् उभयदिने प्रदोषव्याप्त्यभावे अर्धरात्रव्यापिनी ग्राह्या तस्यां लक्ष्म्यागमनकालला
भात् दिवोदासीये तु प्रदोषस्य कर्मकालत्वात् अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान् अतः
स्वलंकृतालिप्ता दीपैर्जाग्रज्जनोत्सवाः सुधाधवलिताः पुष्पमालाद्यालोपशोभिता इति ब्रह्मो
क्तेश्च प्रदोषार्धव्यापिनी मुख्या एककालव्याप्तौ पूर्वप्रदोषस्य मुख्यत्वादर्धरात्रेऽनुष्ठेयाभावाच्चे
ति पूर्वेद्युरेव प्रदोषव्यापिन्यमावस्या आद्ययोग्या परदिने यदि तदा पूर्वेद्युरेव प्रदोषे लक्ष्मीसह
स्रदीपदानं कर्तव्यं श्राद्धं तु परदिनेऽपराह्णे कार्यं यत्तु अप्यशक्तैः प्रकर्तव्यं श्राद्धं पितृपरायणैः
प्रदोषसमये राजन्कर्तव्या दीपमालिकेति क्रमः संपूर्णतिथ्यभिप्रायेणानुवादेन विधिः न
कर्मकालव्याप्तेर्बलवत्त्वात्संपूर्णतिथ्यां प्रामाण्ये इति याव व्याप्यविध्यनुवादानुवादविरोधाच्च
अत्र चामामात्रे रात्रिभोजननिषेधेऽपि रात्रिभोजनं कार्यं निषेधस्य रागप्राप्तिभोजनविषय।

दी. प. ५

त्वात् विधिस्तेहेनिषेधानवकाशात् अथाउक्तं तत्र संध्यासमये लक्ष्मीपूजनमुक्तं लक्ष्म्यै नम
इति नाममंत्रेणैकार्थं महालक्ष्मीं तत्र लक्ष्मीपिंडिकां कांचनेन तथा वर्णयेदिति पूजनानंतरं ल
क्ष्मीस्तवं पठित्वा लक्ष्मीं प्रार्थयेत् नमस्ते सर्वदेवानां वरदासि हरिप्रिये या गतिस्त्वत्प्रपन्नानां
सा मे भूयात्वदर्चनात् तथाचार्येंद्रकुबेरयोरपि पूजा विधेया तयोः पूजामंत्रौ ऐरावतसमारूढो
वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मा इंद्राय ते नमः इति कुबेरस्य पूजायां तु धनदाय न
मस्तुभ्यं निधिपद्माधिपाय च भवंतु त्वत्प्रसादेन धनधान्यादिसंपदः इति अथ लक्ष्मीपूजाप्रयो
गः देशकालौ संकीर्त्याऽस्यां दीपावल्याममावास्यायां ममाऽलक्ष्मीनिवृत्तिपूर्वकस्थिरलक्ष्मी
सर्वसौख्य सौभाग्यावाप्तये सर्वांगसंपन्नलक्ष्मीपूजनं करिष्ये इति संकल्प्य विधाय स्वस्त्ययन
पूर्वकं गणपतिपूजनं विधाय लक्ष्मीं पूजयेत् या श्रीः पद्मासनस्था विपुलकटितटी पद्मपत्रा
यताक्षी गंभीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगण।

रचितैः स्नापिता हेमकुंभैः नित्यं सा पद्महस्ता मम वसतु गृहे दिव्यमांगल्ययुक्ता ॥ इति ध्या
ने ॐ भूर्भुवः स्वः लक्ष्मीः इहागच्छ इह तिष्ठ महालक्ष्मि ममागच्छ पद्मनाभगृहादिह नानोपचा
रसंजेयं त्वदर्थं परिकल्पिता ॥ इत्यावाहने पद्मे हि विष्णुजननि कमले कमलालये कमलेस्मिं
स्थितिं देवि सदा त्वं कृपया कुरु ॥ इत्यासनं गंगादिसलिलाधारं नानागंधाभिमिश्रितं हृद्यागाग्रम
हं पाद्यं मे प्रतिगृह्यतां ॥ इति पाद्यं ॥ रत्नाकरसमुद्भूतैः रत्नभूषाभिभूषिते निधीनामधिपे त्वं हि
गृहाणार्घ्यं नमोस्तु ते ॥ इत्यर्घ्यं ॥ शीतलं जलमानीतं कर्पूरैलासुगंधितं पत्रदाचमनीयार्थं सलि
लं प्रतिगृह्यतां ॥ इत्याचमनं ॥ स्नानं तव महालक्ष्मि कर्पूरागरुवासितं सर्वतीर्थेभ्यः समानीतं स्ना
नेन त्वं प्रतिगृह्यतां ॥ स्नानं ॥ नेत्रसंतानसंनद्धकलाकौशल्यनिर्मितं सर्वांगाभरणश्रेष्ठं वसनं परि
गृह्यतां ॥ इति वस्त्रं ॥ मलयाचलसंभूतं नानापन्नगसेवितं शीतलं बहुलामोदं चंदनं परिगृह्यतां ॥
इति गंधं ॥ अक्षतानरविंदाक्षि नत्रेषामहोदरे माणिक्यपद्मरागाभान् गृहाण त्वं मयार्पितान्

ही. रम्यतनाः मिलत्परिमलामोदमत्तालिकुलसंकुलं नंदनोद्यानसंभूतं पद्मायै कुसुमं नमः इति
पू. पुष्पं गंधसंभारसंवद्धं धूपसुवर्णसमुद्भवं सुरासुरनरानंदि धूपं देवि गृहाण मे इति धूपं मांगे
५ डमंगलाकारं वह्निबिंबाग्नितेजसं निधानं देवि दीपोयं निर्मितस्तव भक्तितः इति दीपं देवतालय
पातालभूतलाधारसंभवं षोडशाकारसंभारं नैवेद्यं तेस्त्रियै नमः इति नैवेद्यं स्नानादिकं वि
धायाथ विधितः सिद्धिस्वाध्यते पुनराचमनं दत्तं महालक्ष्मि गृह्यतां इति पुनराचमनं पातालत
लसंभूतं वदनांभोजभूषणं नानागुणसमाकीर्णं तांबूलं देवि ते नमः इति तांबूलं नारिकेलस
नारंगकदलीमातुलिंगकं देशकालोद्भवं पद्मे गृहाण फलमुत्तमं इति फलं स्वर्णप्रदपदांभोजे
समर्पितमिदं वसु यथाशक्त्या गृहाण त्वमनेन फलमुद्भवे इति दक्षिणा इत्थं अथांगपूजा अव
लायै नमः पादौ पूजयामि चंचलायै नमः जानुनी पूजयामि कमलायै नमः कटिं पूजयामि ह
रिवल्लभायै नमः उदरं पूजयामि ललितायै नमः भुजौ पूजयामि कमलायै नमः हृदयं पूजयामि

ॐ कंठिन्यै नमः कंठं पूजयामि ॐ कमलायै नमः स्तनौ पूजयामि श्रियै नमः शिरः पूजयामि रमा
यै नमः सर्वांगं पूजयामि ततः कुबेरपूजा ॐ भूर्भुवः स्वः कुबेर इहागच्छ इति कुबेरमावाह्य कु
बेराय नमः इति मंत्रेण पाद्यादिभिर्दक्षिणांतैः संपूज्य प्रार्थना कुबेराय नमस्तुभ्यं निधिपद्माधि
पाय च भवंतु त्वत्प्रसादेन धनधान्यादिसंपदः ततोऽगस्त्यपूजा भूर्भुवः स्वः अगस्त्य इहागच्छ अ
गस्त्याय नमः इति पाद्यादिभिर्दक्षिणांतैः संपूज्य प्रार्थना काशपुष्पप्रतीकाश वह्निमारुतसंभ
व मित्रावरुणयोः पुत्र कुंभयोने नमोऽस्तु ते ग्रंथ्यैः पूजने ॐ भूर्भुवः स्वः इंद्र इहागच्छ इत्यावाह्य
ॐ इंद्राय नमः इति पाद्यादिभिः संपूज्य प्रार्थनां कुर्यात् विचित्रैरावणस्थाय पौलोम्यालिंगि।
ताय च भास्वत्कुलिशहस्ताय सहस्राक्षाय ते नमः इति संपूज्य श्रीसूक्तपाठं कुर्यात् ॐ हिरण्य
वर्णां हरिणीं सुवर्णरजतस्रजां। चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह १ तां म आवह जातवेदो
लक्ष्मीमनपगामिनीं यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं २ अश्वपूर्वां रथमध्यां हस्तिना।

श्री· दप्रमोदिनीं श्रियंदेवीमुपह्वयेश्रीर्मा देवीजुषतां ३ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतीं
सू· तृप्तांतर्पयंतीं पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ४ चंद्रांप्रभासांयशसाज्वलंतींश्रियं।
९ महं लोकेदेवजुष्टामुदारां तांपद्मिनीमींशरणंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमि ५ आदित्यवर्णे
तपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअल स्म
क्ष्मीः ६ उपैतुमांदेवसखः कीर्तिश्चमणिनासह प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ७
6 क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ८ गंधद्वा
रांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ९ मनसःकाममाकू
तिंवाचःसत्यमशीमहि पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः कर्दमेनप्रजाभूतामयिसंभ्र
मकर्दम श्रियंवासयमेकुलेमातरंपद्ममालिनीं ११ आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृ
हे निचदेवींमातरंश्रियंवासयमेकुले १२ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीं सूर्यां

१२

नासयमे

हिरण्मयीं लक्ष्मीं जातवेदो मम आवह १४ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीं चंद्रां हिरण्म
यीं लक्ष्मीं जातवेदो मम आवह १५ ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीं यस्यां हिरण्यं प्रभूतं
तं गावो दास्योऽश्वान्विंदेयं पुरुषानहं १६ इति सूक्तं पठित्वा पुष्पांजलिं समर्पयेत् ततो नीराजनं सुर
सुरशिरोरत्नप्रभातारकितक्रमे नवसौभाग्यसंसिद्ध्यै कुर्वे नीराजनं रमे इति नीराजनं दक्षिणाव
र्तिनि केशवभक्तानां वरप्रदे करोमि ते सदा भक्त्या विष्णुकांते प्रदक्षिणं इति प्रदक्षिणं कृत्वा
प्रणामं कुर्यात् ततः सर्वत्र दीपान्प्रज्वाल्य दीपहस्तास्त्रिया देया शस्त्रा देवगृहेषु च गोपु
रोद्यानचैत्येषु नदीपर्वतवेश्मसु हट्टमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च मंदुराकरिशालायां
क्रयविक्रयभूमिषु वस्त्रपुष्पैर्भूषिताः क्रयविक्रयभूमिकाः सर्वत्र दीपदाने मंत्रः अग्निर्ज्यो
ती रविर्ज्योतिश्चंद्रो ज्योतिस्तथैव च उत्तमो ज्योतिषां ज्योतिर्दीपज्योतिर्नमोऽस्तु ते एवं दीपदानं कृ
त्वा महालक्ष्मीं प्रार्थयेत् नमस्ते सर्वलोकानां वरदासि हरिप्रिये या गतिस्त्वत्प्रपन्नानां सा मे

ली. भूपालरत्नेनात् यालक्ष्मीर्दिव्यरूपेगुणेर्दीपावल्यांवभूतले गवांगोष्ठेसुकान्तिकंवासालक्ष्मीर्वे
पू. रदाममइतिवारत्रयंपठित्वा यासापद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षीगंभीरावर्त
८ नाभिस्तनभरनमिताशुभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैःस्नापिताहेम
कुंभैर्नित्यंसापद्महस्तामममवसतुगृहेसर्वमांगल्ययुक्ता सर्वमंगलमांगल्येशिवेसर्वार्थ
7 साधिके शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते अथविज्ञप्तिः रूपंदेहिजयंदेहिभाग्यंभ
वतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे इतिलक्ष्मीपूजनंसमाप्तम्

हो॰ ९॰ १

ॐ श्रीगणेशायनमः अथफाल्गुनपूर्णिमायांहोलिकापूजनं नारदीये फाल्गुने
पूर्णिमायांतुहोलिकापूजनंस्मृतं संचयंसर्वकाष्ठानांउपलानांचकारयेत् तत्राग्निं
विधिवद्धुत्वारक्षोघ्नैर्मंत्रविस्तरैः असृक्पाभयसंत्रस्तैः कृतात्वंहोलिबालिशैः अत
स्त्वांपूजयिष्यामिभूतिभूतिप्रदायिनी इतिमंत्रेणसंदीप्यकाष्ठादिक्षेपणैस्ततः
परिक्रम्योत्सवःकार्योगीतवादित्रनिःस्वनैः होलिकाराक्षसीचेयंप्रह्लादभयदायि
नी अतस्त्वांप्रदहन्त्येवकाष्ठाद्यैर्गीतमंगलैः संवत्सरस्यदाहोयंकामदाहोमतोन्यतः
इतिजानीहिविप्रेंद्रलोकेस्थितिरनेकधा भविष्योत्तरेपि अयंपंचदशीशुक्लाफाल्गु
णस्यनराधिप तस्यांसर्वशंकितालोकान्दसंतुवहसंतुच दारुजानिचखड्गानिगृहीत्वा
समरोत्सुकाः योद्धारइवनिर्यांतुशिशवःसंप्रहर्षिता संचयंशुष्ककाष्ठानांउपलानां
चकारयेत् तत्राग्निंविधिवद्धुत्वारक्षोघ्नैर्मंत्रविस्तरैः ततःकिलकिलाशब्दैस्तालीशब्दैर्म।

नोरमैः तमग्निंत्रिःपरिक्रम्यगायंतुचहसंतुच जल्पंतुस्वेछयालोकानिःशंकाय
स्ययन्मनः भंगवहुविधैःशद्वैःकीर्तयेदेशभाषया विस्तारयंश्चगायंश्चतस्यनामस
हस्रकं सर्वदुष्टापहोहोमःसर्वरोगोपशांतयेत् क्रियतेस्याद्विजैःपार्थतेनसाहोलि
कामता अस्यांनिशागमेपार्थसंरक्ष्याःशिशवोगृहे गोमयेनोपलिप्तेचसचतुष्केगृहां
गणे आकारयेच्छिशून्प्रायामान्बहुमग्रकरान्नरान् तेकाष्ठखड्गैःसंस्पृश्यगीतैर्हास्यकैरःशि
शून् भंसवतेषांदानंचगुडपक्वानमेवच होलिकापूजनेमंत्रः प्रागुक्तःहोलिकाप्र
दीपनंप्रदोषेकार्यं तथाचरथ्यांविंहोदये दुर्वाससोवचनं निशागमेतुसंपूज्याहोलि
कासर्वतोसुखैरिति तच्चभद्रायांसत्यांनकार्यं तथाच भद्रायांदीपिताहोलीराष्ट्र
भंगकरोतिवै नगरस्यचदेष्टासातांपरिवर्जयेदितिपुराणसमुच्चयवचनात् तथाच
भद्रायांद्वेनकर्तव्येश्रावणीफाल्गुनीतथा श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी

हो॰
पू॰
२

दिनार्द्धात्परतोपिस्यात्फाल्गुनी पूर्णिमायदि रात्रौभद्रावसानेतुहोलिकादीपि
कातदेति यदातुपूर्वदिनेचतुर्दशीप्रदोषव्यापिनी परदिनेचक्षयवशात्साया
ह्नेप्रागेवसमाप्यतेतदापूर्वदिनेसंपूर्णरात्रौभद्रासत्वात् तत्रैवतन्निषेधात् परेद्यु
निप्रतिपद्येवाकुर्यात् सार्धयामत्रयंवास्याद्वितीयदिवसेयदा प्रतिपद्वर्द्धमाना
तुतदासाहोलिकास्मृते निर्णयामृते भविष्यवचनात् मदनरत्नेतुपूर्वेयुतुवह्नौ
वह्निंपरित्यजेदिति भविष्योक्तं वह्नौहोलिकायांवह्निंप्रतिपदंवर्जयेदित्यर्थः
तदेतद्भिन्नविषयमिति तत्रैवोक्तं प्रत्येतुतस्यांभद्रामुखंत्यक्त्वेति प्रदोषव्यापि
नीतस्याघस्रपूर्वदिनेतदा भद्रामुखंवर्जयित्वाहोलिकायाप्रदीपनमितिनारद
वचनात् निशागमेप्रपूज्येयंहोलिकासर्वदाबुधैः नदिवापूजयेद्ढुंढांपूजितादुः
खदाभवेदितिदिवोदासीयवचनात् यामत्रयोर्द्ध्वंप्रकाचेत्प्रतिपत्नभवेतिथिः भ

द्वाभ्रंखंवविहायसर्वदिनेपववकार्योऽन्याद्गः नास्मन्त्रंपंचपदमितिरत्नमालायां ग्रमंद्व
राकायायामसर्वाहेवतदेशांभवेद्यदि होलीभद्रावसानेतुनिशांतेपिप्रदीपयेदिति
भविष्योत्तरवचनात् यदातुपूर्वदिनेभद्रारहितःकालोनलभ्यते तदाउत्तरदिनेचतुर्द
र्यामन्यामर्वमेवपूर्णिमासमामाभद्रापुच्छेकार्या पृथिव्यांयानिकार्याणिशुभानितु
शुभानितु तानिसर्वाणिसिद्ध्यंतिविष्टिपुच्छेनसंशयइतिलल्लवचनात् विष्टिपुच्छं
तुज्योतिषे इप्यर्कनखनारीभ्योभद्रापुच्छंघटीत्रयं क्रमेणपंचलेवतेत्वृत्क्रमेणाभि
नितेरेइति ३भु ५ग्रर्क ७ नखा १० ग्रस्मिन्नेवपक्षेयदीतरीपूर्णिमासीमार्हयाम
त्रयपरिमिता ग्रधिकायाप्रतिपदोत्तरदिनेवृद्धिगामिनी तदापौर्णमास्युत्तरप्र
तिपत्प्रदोषपववकर्तव्यः नतुपूर्वरात्रौविष्टिपुच्छेइतिभविष्योत्तरेपूर्वोदाहृतवचनं
पूर्वसतियाउत्तरदिनेपिकृत्स्नप्रदोषतदेकदेशोवाव्याप्ते साउत्तराग्राह्या एवोक्तंतु

हो. प. १

पूर्वविद्धायां सत्यामुत्तरत्र प्रदोषास्पर्शे हुत्वा भावे वक्तेयं न तु यदा पूर्वरात्रिः सर्वा भद्राव्या
प्ता उत्तरदिने प्रदोषस्पर्शपूर्णिमासीशेषस्तु कोपि चंद्रग्रहणाक्रांतो ग्रस्तोदयो वा तदा स
र्वेषामेव वर्णानां सूतकं राहुदर्शने इति स्मृतिवाभिधानात् तत्र कथं होलिकादीपनं स्यादि
ति चेत् उच्यते स्नानाकर्माणि कुर्वीत मृतमन्नं च वर्जयेदिति स्नातो नैरन्तिमनैमित्तिके
कृत्यकारता काम्यानि तु ग्रहणात्पूर्वं ग्रहणोत्तरं न भवंत्येव तथा च ज्योतिर्ग्रंथे त्रयोदशा
दितो वर्ज्यं दिनानां नवकं बुधैः मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः द्वादशादित्रितीयां
तो वैधृतं उत्तये स्मृतः एकादशादिकः सौरे वंत्र्यंतः प्रकीर्तितः एवं ग्रहणयोः प्रोक्तं उ
भयत्र दिनत्रयमिति अस्यापवादस्तत्रैव नित्यनैमित्तिके जप्ये होमयज्ञक्रियासु च उपाक
र्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति होलिकानिर्णयः अथास्याः पूजाविधानं ओं अद्येह हो
लिकापूर्णिमायां मम सपरिवारस्य अरिष्टपादिभयनिवृत्ति पूर्वकामनायामेनाकांक्षित

सर्वमनोसिद्धिसकलनिवृत्तिनैमित्तिकं चंडंडाहुंडालोलिकादीनां सापन्यानां
प्रीतिसहितस्वसंतानरक्षार्थं होलिकापूजनं करिष्ये इति संकल्प तत्राग्निं विधिव
त्प्रतिष्ठाप्य ततोऽग्निं संतेपविधिना चंदनादिभिः संपूज्य होमं कुर्यात् तत्र रक्षोघ्नमंत्रैः
संहृतलाजाहुतीनामाष्टोत्तरशतं जुहुयात् रक्षोघ्नमंत्रास्तु एवं रक्षोहणो वो वलग
हनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ठो यममात्यो निचखानेदमहं तं व
लगमुत्किरामि स्वाहा १ यं मे सर्वबंधुर्यं मम सर्वबंधुर्निचखानेदमहं तं वलगमुत्किरा
मि यन्मे समानो निचखानोत्कृत्योत्किरामि स्वाहा २ स्वराडसि सपत्नराडः समभि
मातिहा जनराडसि रक्षोहा सर्वराडसि मित्रहा स्वाहा ३ रक्षोहणो वो वलगहनो
वनयामि वैष्णवान् स्वाहा ४ रक्षोहणो वो वलगहनो वस्तृणामि वैष्णवान् ५ र
क्षोहणो वो वलगहनाउपदधामि वैष्णवान् स्वाहा ६ रक्षोहनो वो वलगहनो व

हो० प० ४

नयामिवैस्वदेवीवैस्वदेवमसिवैस्वदेवस्य स्वाहा ७ यानः शंसो अररुषो धूर्तिः प्र
णङ्मर्त्यस्य रक्षा णो ब्रह्मणस्पते प्रत्युष्टं रक्षः प्रतिष्टाः स्वाहा ८ अरातयो निष्टप्त
ं रक्षो निष्टप्ता अरातय उर्वन्तरिक्षमन्वेमि ९ रक्षोहा विश्वचर्षणिरभि योनि
मयोहते द्रोणे सधस्थमासदत् स्वाहा १० एभिर्मंत्रैर्दशाहुत्या लाजाहोमः अथ
वाष्टोत्तरशतैः प्रथममंत्रेण सर्वैरेव वा शतमष्टोत्तरं एवमष्टाविंशतिरेव वा त
तो विधिवदग्निं संपूज्य प्रार्थना अस्माभयसंत्रस्तैः कृता त्वं होलि बालकैः अ
तो मां पाहि भीतिभ्यो माते वा पत्यमात्मनः १ आयुर्देहि यशो देहि शिशूनां ऊरुरक्ष
णं शत्रूणां वर्त्तयं ये हि होलिके रजिता सदा इति संजाते प्रार्थनामंत्रः ततो अग्निं त्रिः
परिक्रम्य जलं लात्वा वहस्तं तत्र जलं लात्वा सेच्छया चैव यस्य यस्य च यन्मनः होलिके च न
मस्तुभ्यं फाल्गुने जो विमर्दिनि सर्वोपद्रवशांत्यर्थं गृहाणार्घ्यं नमोस्तुते इत्यर्घ्यं दा

त्वाग्निं प्रार्थयेत् यन्मया शीतभीतेन निषिद्धाचरणं कृतं तत्सर्वं क्षम्यतां वह्ने यतः स
र्वंसहो भवान् अनेन मन्त्रेण तेनाग्निं पूजितेन अस्मत्पापघ्न उं उं फं फा होलिकादयः सर्वाः
प्रीता भवन्तु तथा च यथाविधिकृतेन होमेन भगवान्सर्वोपद्रवनाशको वह्निः श्री
यतां ततो दक्षिणासंकल्पं कृत्वा तिलकधारणं विधाय कृतशेषधानादि सर्वैः अश
मीयं तस्यां रात्रौ गानक्रीडाहास्यालापादिकं रुचिविधेयं अद्यास्य कृतस्य होलिका
पूजादिकर्मणो न्यूनातिरिक्तदोषपरिहारार्थमिदं दक्षिणाद्रव्यं यथानामगोत्राय
दातुं महमुत्सृजे ततो विभूतिधारणमन्त्रः वंदितासि सुरेन्द्रेण ब्रह्मणा शंकरेण
च अतस्त्वं पाहि मां देवि विभूतिर्भूतिदा भव इति होलिकापूजा एवं होलिकापूज
नं विधाय दोलागतं गोविंदं निरीक्ष्यमाणः सर्वदोषविमुक्तो भवतीत्याचारः न
रो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमं फाल्गुन्यां संयतो भूत्वा गोविंदस्य पुरं व्रजेदि

हो॰ पृ॰ ५

ति कृत्वाचावश्यककर्माणिसंतर्प्यपितृदेवताः वंदयेद्धोलिकाभूतिंसर्वदोषोप
पशांतये ॥ इतिहोलिकापूजासमाप्तम्

5

न॰ पृ॰ १

ॐ श्रीगणेशाय नमः अथ नवरात्रपूजनं एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा
आवाहयाम्यहं देवि सर्वकामार्थसिद्धये अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया
कुरु रक्षां कुरु सदा भद्रे विघ्नेश्वरि नमोऽस्तु ते इति आगच्छ वरदे देवि दैत्यदर्पनिषूद
नि पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये सर्वतीर्थमयं वारि सर्वदेवसमन्वितं
इमं घटं समागच्छ तिष्ठ देवगणैः सह दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय
बलिं पूजां गृहाण त्वं अष्टाभिः शक्तिभिः सह इत्यावाहनमंत्रेणावाहयेत् मूर्तिपू
जने तु सर्वतीर्थमयमिति श्लोकान्न पठनीयः पूजा तु जयंतीमंत्रेण दुर्गामंत्रे
ण वा कार्या तदुक्तं देवीपुराणे कुर्याद्देव्यास्तु मंत्रेण पूजां स्तोत्रहुतादिभिरिति
जयंती मंगला काली भद्रकाली कपालिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु
ते अनेनैव तु मंत्रेण जपहोमौ तु कारयेदिति दुर्गामंत्रो वैदिकः आगमिको वा वैदि

कोजागरव्रते स्मरस्मादि आगमिकस्तु ॐ दुर्गे दुर्गे रक्षणि स्वाहेति नवाक्षरः तल्लिङ्गैः पू-
जयेत्तमेवदिति साधारणवाक्यात् स्कांदे तु दुर्गामेकस्तु रेकार्यं भवेदुःखविनाशिनि
पूजयामि सदाभक्त्या दुर्गे दुर्गार्तिनाशिनी अनेनैव तु मंत्रेण जपहोमादिकारयेदि
त्युक्तेः पूजा च षोडशोपचारैः पंचोपचारैर्वा अनेनैव राजोपचारैर्छत्रचामरादिभि
र्यथाविभवं कार्या पूजायां वादित्राणामभावे घंटावादनं कार्यं तदुक्तं वादित्रा।
णामभावे तु पूजाकाले च सर्वदा घंटाशब्दो नरैः कार्यः सर्ववाद्यमयी यतः पाद्या
दौ विशेषा देवीपुराणे पद्मश्यामाकदूर्वा च विष्णुक्रांतादि चिष्यते गंधपुष्पाक्षत।
यवकुशाग्रतिलसर्षपाः तत्रैव विल्वपत्राक्षतैः पुष्पैर्देयं दूर्वा कुशान्वितैः सामा
न्यः सर्वदेवानामर्घोयं परिकीर्तितः पुष्पं सारस्वतानि यो रक्तमंशुकं तं चैव पयो
दधि सदैवत्त प्रत्यग्रमाणं वा ग्राह्यं मधुपर्कं रहोच्यते आचमनेन तु जातीलवंग

न० दु० २

कंकोलादिद्रव्याणि देयानि पंचामृते स्नंकोदे दीपाद्दशगुणं दशो हुतेनैव दशोत्तरं
हुताद्दशगुणं तोयं तोयाद्दशगुणं नैवेद्यंजंतथ्येति स्नानं तेमाषभक्तबलिं कूष्मांडादिबलिं
निवेदयेत् ततो नीराजनं कृत्वा यथाशक्ति वैदिकमागमिकं वा दुर्गामंत्रं जपेत् दु
र्गाग्रतो जपेन्मंत्रमिमं एकचित्तः समाहितः इति देवीपुराणात् ततश्चंडीपाठं कृत्वा दे
वीं प्रार्थयेत् महिषघ्नि महामाये चामुंडे मुंडमालिनि द्रव्यमारोग्यविजयं देहि दे
वि नमः सदा भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि देवेभ्यो मानुषेभ्यश्च भये
भ्यो रक्ष मां सदा सर्वमंगलमंगल्ये शिवे सर्वार्थसाधके शरण्ये त्र्यंबके गौरी नारा
यणि नमोस्तु ते रूपं देहि यशो देहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वा
न्कामांश्च देहि न इति ततः शिवरहस्योक्तं दुर्गास्तोत्रं पठेन्नरः दुर्गां शिवां शांति
करीं ब्रह्माणीं ब्रह्मणः प्रियां सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवां मंगलां

शोभनां शुभ्रां निष्कलां परमां कलां विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहं
सर्वदेवमयीं देवीं सर्वरोगभयापहां ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमां विं
ध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं योगिनीं योगमातां च चण्डिकां प्रणमा।
म्यहं ईशानमातरं देवीमीश्वरीमीश्वरप्रियां प्रणतोस्मि सदा दुर्गां संसारार्णवतारि
णीं यश्चेदं पठति स्तोत्रं शृणुयाद्वापि यो नरः स मुक्तः सर्वपापेभ्यो मोदते दुर्गया सह।
ति ततः पुष्पांजलिं दद्यात् इति दुर्गापूजाविधिः अथ कुमारीपूजनं तत्र प्रत्यहं।
यथाशक्ति एकद्व्यादिक्रमेण कार्यं तन्नमस्कारश्च देवीपुराणे ब्रह्मोवाच ततश्चात्र
ध्यानेन शक्रहोमप्रदानजपेन तु कुमारीभोजनेनात्र यथा देवी प्रसीदति अत्र नवरात्रे
पितरो वसवो रुद्रा आदित्या गणलोकपाः सर्वे ते पूजितास्तेन कुमार्यो येन पूजिताः
शुक्लाष्टमी च तद्देशेणा नवम्यां च विशेषतः कुलमपते विशेषेण भोजयेत्तु कुमारिकार

न० ति अन्यत्रापि प्रक्षाल्यपादौ सर्वासां कुमारीणां चैवासनं सलिलैश्शुभैस्तलेरम्ये ततश्च
१२ तस्यामनेस्थितास्ताः पूजयेद्गंधपुष्पैश्च सन्निभस्थापितमनोरमैः पूजयित्वा विधानेन भो
१ जनेन ताः सदा पयेत् खंडलड्डुगुडसापूपं दधिक्षीरं समन्वितं नासां देयं कुमारीणां श्र
नैर्भुंजापयेत्ततः पानीयं पाचितं देयमन्नं वा पार्वितं शुभं ताम्बूलं मान्ययदा सर्वा स
दाम्बाचमनं ददेत् आचम्य वा ततनान्दत्वा त्वयान्तेतत्वमिस्तुत दानः शिरसि दातव्याः
कन्यकाभिरक्षाततः तेनापि प्रणिपातस्तु कर्तव्यो भक्तिपूर्वकः अनेन विधिना
शश्वद्देवीति पुं प्रसीदति ददाति विविधाकामात्मनोभीष्टान्नराधिप राज्यं कृत्वा
ततः पश्चाद्देवलोके च गच्छति कौन्तेय एकां कन्यां भोजयित्वा पैश्वर्यं लभते नरः
कन्याद्वयं भुक्तिमुक्ति त्रिवर्गफलदं त्रयं चतुष्टयं राज्यदं च सर्वकामफलप्रदं वि
द्याप्रदं पंचकं च षट्कं षट्कर्मसिद्धिदं सप्तभिर्लभते राज्यमष्टभिर्गणसंपदः

नवभिः पृथिवीपाः स्यात्कुमारीभिश्च पूजनादिति॥ स्कांदे एकैकां पूजयेत्क
न्यामेकवृद्ध्या तथैव च द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं च वा नवभिर्लभते भू
मिमैश्वर्यं द्विगुणेन तु एकवृद्ध्या लभेत्क्षेममेकैकेमश्रियं लभेत् एकवर्षा तु या
कन्या पूजार्थं तां विवर्जयेत् गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते द्विवर्षक।
न्यामारभ्य दशवर्षावधि क्रमात् नामानि च क्रमेण कुमारिका त्रिमूर्तिः कल्याणी रो।
हिणी काली काली चंडिका शांभवी दुर्गा सुभद्रेति नामानि क्रमात् स्कांदे कुमारि
का द्विवर्षा तु त्रिवर्षा तु त्रिमूर्तिनी चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी षट्
वर्षा तु भवेत्काली सप्तवर्षा तु चंडिका अष्टवर्षा शांभवी तु दुर्गा तु नवभिः स्मृता
दशवर्षा सुभद्रेति नामभिः परिकीर्तिताः अत ऊर्ध्वं तु याः कन्याः सर्वकार्येषु व।
र्जिताः आसां क्रमेण फलान्याह स एव दुःखदारिद्र्यनाशाय शत्रूणां नाशनाय च

ने. पू.
४

आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः आयुष्कामस्त्रिमूर्तिं त्रिवर्गस्य फलाप्तये
अपमृत्युव्याधिपीडाद्यैः त्वोनामपन्नमये सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये
कल्याणीं पूजयेद्धीमान्त्रिमेकल्याणवृद्धये आरोग्यसुखकामस्तु लक्ष्मीकामस्तथै
व च यशस्कामी नेत्रानिं च रोहिणीं परिपूजयेत् विद्यार्थी विजयार्थी च राज्यार्थी च वि
शेषतः शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः संग्रामी जयकामी च चण्डिकां प
रिपूजयेत् दुःखदारिद्र्यनाशाय तत्र सम्मोहनाय च महापापविनाशाय शाम्भवीं च
प्रपूजयेत् सर्वलोकवशीकरणात् स्वयमाधनकर्मणि दुर्गां दुर्गार्तिनाशाय पूजयेद्यत्न
तो बुधः सौभाग्यधनधान्यादिवाञ्छितार्थफलाप्तये सुभद्रां पूजयेन्मर्त्यो दासीदास
विवृद्धये एवं प्रकारस्सततं चैव प्रातःकाले विशेषेण कृताः पञ्चगो विशेषतः आवा
हयेत्ततः कन्यां मन्त्रेणानेन भार्गव मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीं नव

दुर्गात्मिकां मातां तां कन्यां मायावायह्वयाम्यहं आवाहनमंत्रः नत्वां संपूजयेद्धीमान्मंत्रै
रेभिः पृथक्पृथक् जगत्सृष्टेः सर्ववेद्ये सर्वशक्तिस्वरूपिणि पूजां गृहाण कौमारि ज
गन्मातर्नमोस्तुते कुमार्याः त्रिगुणां त्रिगुणाधारां त्रिवर्गज्ञानरूपिणीं त्रैलोक्यवंदि
तां देवीं त्रिमूर्तिं पूजयाम्यहं त्रिमूर्त्तेः कलात्मिकां कलातीतां कारुण्यहृदयां परां
कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहं कल्याण्याः अणिमादिगुणाधारामका
राद्यक्षरात्मिकां अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं रोहिण्याः कामचारीं शु
भां कांतां कालचक्रस्वरूपिणीं कामदां करुणोदारां कालीं संपूजयाम्यहं चंडिकाः
सदानंदकरीं शांतां सर्वदेवनमस्कृतां सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहं
शांभव्याः दुर्गमे दुस्तरे कार्ये भवदुर्गविनाशिनी दुर्गायाः सुंदरीं स्वर्णवर्णाभां
सुखसौभाग्यदायिनीं सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं सुभद्रायाः पव

न. समभ्यर्च्य वैनेकयात्र कुमारीणां प्रयत्नतः कंचुकैस्ववस्त्रैश्च गंधपुष्पानुलनादिभिः
पू. नानाविधैर्भक्ष्यभोज्यैर्भोजयेन्मायसादिभिः प्रत्यहं ब्राह्मणाः भोजनं योगिनीभोजनं
५ चोक्तं नारदीये प्रत्यहं भोजयेद्विप्रान्कुमारीर्योगिनीरपि हीनाधिकांगीं कुष्ठादि
विकारां कुलांतथा ग्रंथिस्फटितगर्भांगीं रक्तश्यवर्णां किंतो जातांधां केकरीं काणां
कुरूपां तनुरोमशां संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां अरोगिणीं सुरूपांगीं सर्व
पांत्रणवर्जितां एकवंशसमुद्भूतां कन्यां सम्यक्प्रपूजयेत् ब्राह्मणीं सर्वकार्येषु जया
र्थी नृपवंशजां लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजां दारुणे चांत्यजातीनां पूज
येद्विधिनानर इति क्वचिन्मेरुतंत्रमयोमिति सर्वासामेकपवमेड उक्तः यथोक्तालाभे
नदेवीपूजनं विवाहानंतरं नाशौ कन्यात्वमुपगच्छति तावत्संपूजनीकन्यायाव
न्माघ्नं नरूपयेत इति कन्यापूजनं अथ बलिदानं तत्रादौ देवीप्रीत्यर्थं बलिदान

महं करिष्ये इति संकल्पयेत् कालिकापुराणे उत्तराभिमुखो श्वना बलिं पूर्वमु
खं तथा निरीक्ष्य साधकः पश्चादिमं मंत्रमुदीरयेत् पशो त्वं बलिरूपेण मम भा
ग्यादुपस्थितः प्रणमामि ततः सर्वरूपिणं बलिरूपिणं मंत्ररत्नप्रकाशे पशुं स्ना
पयित्वा सिंदूरतिलकं दत्वा चक्षुषावलोकयेत् मूलेन प्रोक्षणतीर्थमंत्रैः प्रोक्ष
येत् तीर्थमंत्रा वैदिकास्तांत्रिकाश्च अग्निः पशुरासीत्तेनायजंत स एतं लोकम
जयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः १ वायुः पशुरा
सीत्तेनायजंत स एवं लोकमजयद्यस्मिन्सूर्यः स ते लोको भविष्यति तं जेष्य
सि पिबैता अपः २ सूर्यः पशुरासीत्तेनायजंत स एतं लोकमजयद्यस्मिन्सूर्यः
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ३ वाचं ते शुंधामि प्राणं ते शुंधामि
चक्षुस्ते शुंधामि श्रोत्रं ते शुंधामि नाभिं ते शुंधामि मेढ्रं ते शुंधामि पायुं ते शुंधामि

न. सू. ५

6

चरित्रांस्तेषुं भ्रयामि मनस्तआप्यायतां वक्त्रस्तआप्यायतां देव्यैनानुष्टुभ्मुपाकरोमि
वाराहीयमुनागंगाकरतोयासरस्वती कावेरीचंद्रभागा च सिंधुभैरवसागरः अनन्ता
नेमामायांतुयेवामेनदैसंतकाः पशुपाशविनाशाय हेमकूटस्थिताय च परायपरमे
ष्ठिने हुंकाराय च मूर्त्तये एभिर्मंत्रैस्तु संप्रोक्ष्य वामे मंडलमालिखेत् वेदीस्थंडीयजेन्नेत्र
कुमारीमूजयेत्ततः तद्बलिंतत्रसंस्थाप्यश्रोत्रेयेत्साधकोत्तमः ह्रेंह्रूंपशून्हनहनह्रूं २
फट्इमम्भृहेत् ततोरक्तमालायमस्तकेपशुंवेष्टयेत् मेषाकारस्तंभमध्येपशुंवेष्ट २
सर्वांगेसर्वावयवंपशुंवेष्टय २ ब्रह्मांडखंडमध्येपशुंवेष्टय २ ॐ ह्रूंफट् इतिवधाय
नयेत् परमपशुरूपिणेनमः रुधिरंवेधनायनमःशिरसि चंडिकायैनमःललाटे
सरस्वत्यैनमोमुखे चंद्रादित्याभ्यांनासिकायां अन्नानासिकायैकर्णयोः वैसम्यैजि
ह्वायां पद्मनाभायउदरे भैरव्यैनाभौ रुधिरोन्मत्तायैपादेषु ततःकर्णेजपेत् हिलि २

वज्ररूपधरायै चंडदुर्गायै इमं पशुं स्वर्गे नियोजय २ मुक्तिं प्रदर्शय २ ह्रीं चंडमंडला-
धिष्ठितविग्रहायै पशुरूपं चंडिकायै पशुं मोक्षयामि स्वाहा ॥ कुशाक्षतजलान्यादायो-
त्सृजेत् कृतांजलिः पठेत् ॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयिष्यामि
तस्माद्यज्ञे वधोऽवधः ॥ पशुस्त्वमादितो देवैर्यज्ञार्थं च विधानतः ॥ इदानीं त्वं महोत्साहाहाच्छेत्तव्यो-
ऽसि मया पुनः ॥ अजोऽसि त्वं पशुत्वेन यज्ञार्थं निर्मितः पुरा ॥ अतः सर्वनिदानेन त्वं प्रीणयजोक-
रोम्यहं ॥ पशुमेनं मया दत्तमपशुत्वं प्रदेहि मे ॥ देवताबलिदानेन मांसेन रुधिरेण च ॥ दातं
एव छिन्नाशाय छागलाय नमो नमः ॥ लोकानामुपकारार्थं पशुः सृष्टो मयाधुना ॥ प्रोक्षितो भ-
वानीप्रीत्यै मामात्मानं च तारय ॥ अथ खड्गपूजा ॥ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणं ॥
उग्रं रक्तास्यनयनं सर्वासुरभयंकरं ॥ रक्तांबरधरं चैव पाशहस्तं जटाविनं ॥ पिबमानं च रुधिरं
भुंजानं क्रव्यसंहतिं ॥ रसनात्वं चंडिकायाः सुरलोकप्रसादक ॥ इति ध्यात्वा पूजयेत् ॐ खैं २

न० ए०
८

फट् वज्रेश्वरि खड्गरूपिणि नीलताधारेण पशुं संहर २ ॐ ह्रीं कालिकालि वज्रेश्वरि लो
हदंडायै नमः इति संपूज्य असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः श्रीगर्भो विजयश्चैव
धर्मपालनमोस्तु ते इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा नक्षत्रं कृत्तिकास्ते तु गुरुर्दे
वो महेश्वरः हिरण्यं च शरीरं ते दैवतं च जनार्दनः पिता पितामहो देवस्त्वं मां पालय सर्वदा
नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धोमर्षणश्च अतितेजास्तथैव च इयं
येन धृता लोणी हतश्च महिषासुरः तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः इति
स्तुत्वा रत्नार्घ्यं बंधनं स्योस्मिन्कर्मये मोचितो मया देव्याः प्रीतिसमुत्पाय स्वर्गं गच्छ पशु
नमः इति वेधान्मोचयित्वा मूलमंत्रं पठेत् अथापरेण मंत्रेण छेदयेत् ॐ ह्रीं श्रीं चैं चं
डिकायै लोहदंडायै ह्रीं ह्रीं इमं पशुं महान्तसिंमहानंदं कुरु २ स्फुर २ स्वष्टं देवि शत्रून् २
स्वाहा कालिकालि स्फें २ कालि वज्रेश्वरि खड्गपाणिनि नीलताधारेण हनि स्वाहा

ग्रंयेबलिमेयादत्तः पशूनां वपसत्तं मे गृह्ण २ महादेवि रक्तमांडरितार्णवान्
हृधिरमस्तकं स्कंधेनततो देव्यै निवेदयेत् घोरदंष्ट्रकरालास्य मद्यमांसप्रिये सदा
बलिं गृह्ण महादेवि पशुरक्तं समांसकं ॐ चंडिके चंडिकायै कालकालकराश्च परिह
नायै ह्रीं २ इदं पिशितं रक्ताक्तं गृह्ण २ स्वाहा आहारहृधिराक्तं तु बलिं गृह्ण जयं
कुरु मम शत्रुसंहारिणि नवदुर्गे महार्चिते इमं पिशितरक्ताक्तं गृह्ण स्वाहा ततो
देवीं स्नानं तथा सख्यमुद्राः संविहरेत् इति बलिदानविधिः ॥

8

वा. ॐ श्रीगणेशाय नमः वरो वरेण्यो वरदो वराहो धरणीधरः अपवित्रे पवित्रे मां करो
स्ना. २. तु भगवान्हरिरिति मंत्रेण तिलकल्कादिविलेपनपूर्वकं स्नात्वा संध्यापूजादिनि
१ त्यविधिं समाप्य संकल्पं कुर्यात् ॐ मद्येत्यादिदेशकालौ संकीर्त्यात्मनोऽखिलपा
पक्षयपूर्वकं पैशाच्यादिदुर्गतिनिवारणद्वारा विष्णुप्रीत्यर्थं पुत्रपौत्रादिपरिवार
सहितचिरंजीवत्वस्वत्वसौभाग्यादिसदभीष्टसिद्ध्यर्थं वामनजयंतीव्रतोद्यापनां
गभूतवामनस्नानविधानं करिष्ये आचार्यवरणादिनांतं तंत्रं समाप्य मंडपांतर्वे
दिकायां पीठादौ देवताः पूजयेत् आधारशक्त्यै नमः विमलायै नमः उत्कर्षिण्यै
नमः ज्ञानायै नमः क्रियायै नमः प्रह्व्यै नमः सत्यायै नमः मेधायै नमः मध्ये प
रदेवतायै नमः परितो बाह्ये इंद्रादिलोकपालेभ्यः सायुधेभ्यः सपरिवारेभ्यो नमः
पूर्वादिदिक्षु गणपतिः दुर्गां क्षेत्रपालं वास्तोष्पतिमभ्यर्च्य सर्वतोभद्रे प्रसार्य

तत्र ब्रह्मादिदेवानामावाह्य संपूज्य तदुपरि कुशान् कृत्वा जिनं वा प्रसार्य तत्र द्रो
णपरिमिते तिलपर्वते अलाभे यवगोधूमान् उपरि तिलपूरिते पात्रे सकलशे संस्था
प्य तत्र द्वादशाङ्गुलपात्रे हैमीं वामनप्रतिमां स्थापयेत् तत्र मंत्रः त्रीणि पदानि विचक्र
मे विष्णुर्गोपा अदाभ्यः अतो धर्माणि धारयन् इति संस्थाप्य पूजयेत् अथ ध्यानं ध्यात्वा
जलमध्ये देहं देवदेवस्य चक्रिणः ब्रह्माण्डमुदरे यस्य महद्भूतैरधिष्ठितं मायावी वाम
नः श्रीमान् समं पाणाज्जगत्पतिः शिखी कमण्डलुधरः छत्री यज्ञोपवीतवान् एवं लक्ष
णं संपन्नं वामनं पूजयेद्धरिं सहस्रशीर्षेति आवाहनं आगच्छ देवदेवेश तेजोराशी
जगत्पते क्रियमाणां मया पूजां गृहाण सुरसत्तम १ पुरुषएवेदम् आसनं नानारत्नस
माकीर्णं कार्तस्वरविभूषितं आसनं देवदेवेश पूजार्थं प्रतिगृह्यतां २ एतावानस्य पाद्यं
पाद्यं गृहाण देवेश सर्वतत्त्वं करं प्रभो भक्त्या समर्पितं देवलोकनाथ नमोस्तु ते ३ त्रिपा

वा·
ह्या·पृ·
२

हद्दत्यर्घं नमस्तेदेवदेवेशानमस्तेधरणीधर नमस्तेजगदाधारअर्घ्योयंनःप्रतिगृ
ह्यतां ४ रनोविशदृश्माचमनं कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं आचम्यतां
जगन्नाथमयादत्तंहिभक्तितः तस्माद्यज्ञात्सर्वहुतःसंभृतमितिस्नानं पंचामृते
मयानीतंस्नानार्थेपरमेश्वरः शार्करासमायुक्तंपयोदधिघृतंमधु अजनायमहेशा
यजलजास्त्रायशोरिणे नमस्तेकेशवानंतवासुदेवनमोस्तुते ८ तस्माद्यज्ञात्सर्व
हुतऋचःसामानिवस्त्रं सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयापपादि
तेतुभ्यंवाससीप्रतिगृह्यतां ७ तस्मादश्वेतियज्ञोपवीतं सर्वदेवनमस्तेस्तुत्राहि
मांभवसागरात् ब्रह्मसूत्रंमयानीतंगृहाणपरमेश्वर ८ तंयज्ञमितिगंधं मलयेषु
संभूतंत्वंगंधपुष्पकंमनोहरं मयानिवेदितंगंधंगृहाणपुरुषोत्तम ९ यत्पुरुषमिति
पुष्पं मालादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपूजार्थंपुष्पाणिप्रति

गृह्यतां पुष्पहस्तेति अंगहस्तांकर्यात् पादादावेकमेकांग हस्तेयेच्छीर्षमंततः पा
दौ मत्स्याय च नमः नमः कूर्माय जानुनी वराहाय च नमो गुह्यं नृसिंहायेति नाभितः
उरस्तु वामनायेति भुजौ रामाय वै नमः मुखं श्रीरामचंद्राय कृष्णाय च नमः शिरः म
त्स्यं कूर्मं वराहं च नारसिंहं च वामनं रामं रामं रामकृष्णमचेयामीहतेनमः ततो धू
पादिहस्तो ब्राह्मणोसेति धूपः धूपोयं देवदेवेश शंखचक्रगदाधर अच्युतानंतगो
विंद वासुदेव नमो नमः ११ चंद्रमामनसेति दीपं त्वमेव पृथिवी ज्योतिर्वायुराकाश
मेव च त्वमेव ज्योतिषां ज्योतिर्दीपोयं प्रतिगृह्यतां १२ नाभ्या आसीदिति नैवेद्यं अन्नं
चतुर्विधं स्वादुरसैः षड्भिः समन्वितं मयानिवेदितं देव प्रसीद परमेश्वर १३ यत्पुरुषे
ण हविषा इति तांबूलं पूगीफलं महादिव्यं नागवल्लीदलैर्युतं कर्पूरैलासमायुक्तं
तांबूलं प्रतिगृह्यतां १४ इदं फलं मया देव इति फलं सप्तास्यासन्निति दक्षिणा हिर

वा.
द्वा.ए.
२

एणगर्भेणगर्भस्थमित्यादिपठेत् १५ वेद्मादित्योवयरुणोविष्णुर्द्रग्निस्तथैवच त्वमे
वसर्वज्योतींषिआर्तिकंप्रतिगृह्यतां इतिनीराजनं यानिकानिचपापानितिप्रा
द्दतिणा यज्ञेनयज्ञमितिमंत्रपुष्पांजलिः नमस्तेपुंडरीकाक्षनमस्तेस्त्वमरप्रिय
नमस्तेजगदाधारदेवदेवनमोनमः इतिनमस्कारः १६ ततःप्रार्थना अग्निर्य
मोवैश्रवणःकेशवःसलिलेशिवः त्वष्टायमोथवरुणःपापंमेहरतुसर्वदा जगत्
स्त्रोजगद्वंद्यअनादिर्जगदंतकृत् जलाशयोजगद्योनिःप्रीयतांमेजनार्दनः अनेक
कर्मनिर्बंधध्वंसनेजलशायिने नतास्मिमथुरावासेमाधवेमधुसूदने नमोवाम
नरूपायनमस्तेस्तुत्रिविक्रमः नमस्तेबलिबंधायवामनायनमोनमः नमोनमस्ते
गोविंदवामनेशत्रिविक्रम पापमस्मेहरतयंकृत्वासर्वकामप्रदोभव सर्वगःसर्वदेवे
शःश्रीधरःश्रीनिकेतनः विश्वेश्वरायविश्वेश्रीशायचनमोनमः एवंसंपूजये।

द्वैोपकादर्पणान्तेरोत्तमः जागरं तत्र कुर्वीत गीतवाद्यैश्च मंगलैः प्रातः स्वो
क्तविधिना पूजयेद्वामनं हरिं स्त्रियो वा पुरुषो वापि वामनं मन्त्रवद् ददेत् वामा।
नः प्रतिगृह्णाति वामनो वै ददाति च वामनस्तारको भाभ्यां वामनाय नमो नमः
इति पूजा ॥ अथोद्यापनांगभू।
तो होमः तत्र स्वगृह्योक्तविधिना अग्निं प्रतिष्ठाप्य अन्वाधानान्तमग्निकार्यं स।
माप्य वामने पायसं घृतसंमिश्रितं तिलैः प्रतिद्रव्यमष्टोत्तरशतसंख्याकाहु।
तिभिः पीठदेवब्रह्मादिदेवताभ्य एकैकयाहुत्या पश्चेत् इति भिलप्य इरावती तिमं
त्रेण पायसं घृतं च जुहुयात् इरावती धेनुमती हि भूतं सूयवसिनी मनवे दश।
स्याव्यस्कभ्नाद्रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा १०८ इ
दं विष्णुरिति पालाशसमिद्भिः इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढम।

वा. द्वा. पू. ४

स्यपांꣳसुरे स्वाहा १०८ त्रीणिनाम्नहोमः त्रीणि पदानि विचक्रमे विष्णुर्गोपा अ-
दाभ्यः अतोधारयन्स्वाहा १०८ विष्णोःकर्माणिमन्त्रहोमः विष्णोःकर्माणि पश्य-
तयतो व्रतानि पस्पशे इन्द्रस्य युज्यःसखा स्वाहा १०८ ततो होमशेषं समाप्य द्वाद-
श विप्रान् वस्त्रादिना संपूज्य दध्यन्नमुपवीतगोपीचंदनपूगीफलदक्षिणायुतान्
करकान् तेभ्यो दद्यात् तत्र मंत्रः वामनः प्रतिगृह्णातीति मंत्रपाठः ततः एकस्मै गो-
पिनलहर्णं दधिभक्तयुतं द्विजकरकं ते प्रयच्छामि वामनः प्रीयतामिति वामनः
प्रतिगृह्णातीति पठित्वा आचार्याय दद्यात् सोपस्करे शय्यां गां च व्रतस्यैव आचा-
र्याय दत्वा पूर्णाहुतिं विधाय ईशानकलशोदकेनाभिषेकं विधाय स्वस्मानपि भूरिद-
क्षिणादिभिः परिदक्षिणादिभिः परितोष्य आशिषो गृह्णीयात् श्रीकृष्ण उवाच एवं
दत्वा ततः प्रातर्भोजनेष्टदारात्मके एवं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुञ्जीत वाग्यतः भूयो

भूयोयमेकस्या राजन्सर्वैर्व्रतैर्विधिः स्मृतः एवंकृतेत्वनेनराजन्नःपुण्यंपतत्स्वक्षयमे
यावत्कल्पशतंस्रष्णोनावह्वर्षाणिमेवेया प्राप्यविस्मपुरेभोगान्मुक्तोनेकल्पसंततेय
रहागत्यभवेद्राजाराजन्भिक्षापिमेविनः हस्त्यश्वरथपादातीदाताभोक्ताविमत्सरी
रूपसौभाग्यसंपन्नोरोगीहोपुनीतिसंयुतः पुत्रपौत्रपरिवृतोजीवेत्सशरदांशतं एषापु
ष्टिमेयाख्याताद्वादशीसत्रयुधिष्ठिरः एवमेवसमाख्याताद्वादशीश्रवणान्विता उपोष्ये
कादशींपश्चाद्वादशीमप्युपोषयेत् नचात्रविधिलोपःस्यादुभयोर्देवताहरिः बुध
श्रवणसंयुक्ताद्वादशीसंगमोदकं स्नानेदग्धोदनेसम्यगुपवासोर्चनेहरेः सगरे
णककुत्स्थेनधुन्धुमारेणगाधिना एतैश्चान्यैश्चराजेन्द्रकृतोयंद्वादशीविधिः २
तिभविष्योत्तरपुराणेमाघापनवामनजयंतीव्रतंसमाप्तम्

5

ग. ॐ श्रीगणेशायनमः अथप्रसंगाद्वैस्नवलक्षणमुच्यते सांगमष्टदशमन्त्रासेस
सू. म्यक्षिक्तंदद्वैवंत सदीक्षाविधिमथ्यानेसंपन्नेद्वादशात्तरं अष्टात्तरमथान्यंवयेम
१ त्रेमस्तुपासते तेवाप्रोवैस्नवालोकेविस्नुर्चनरताःसदा सदीक्षाविधिसांगवाम
त्राजमथ्येत्रकं सहस्रात्तरंसंयुक्तंमूलव्यूहादिभेदतः पंचायतनरूपंवयेविप्राः
समुपासते महावैस्नवसंज्ञास्तेमहाविस्नोरतिप्रिया इतिविस्नुपुराणे नचल
तिनिजवर्णधर्मतोयःसममतिरात्मसुहृद्विपक्षेमध्येनहरतिनहंतिकंचिदुच्चैः
सितमनसंतमवेहिविस्नुभक्तं श्रीभागवतेपि त्रिभुवनविभवहेतवेप्यकुंठस्मृ
तिरजितात्मसुरादिभिर्विमृग्यात् नचलतिभगवत्पदारविंदाल्लवनिमिषार्द्ध
मपीहवैस्नवाग्र्यः इत्यादि इतिवैस्नवलक्षणं अथाशक्तविषयेप्रतिनिध्यादिकंतम
त्रिभाषायांद्रष्टव्यं रामार्चनचंद्रिकायां सदीक्षामाहवागम्ः प्रकारःसोभिधीय

ने क्रमेण योजयेत्सर्वं वैसौकर्मार्थं व्रतार्थिनां षडक्षरादिकैराममंत्रैः स्यान्मज्जनं य
था सर्वेषां राममंत्राणां मंत्रराजः षडक्षरः तारकं ब्रह्म चेत्यस्मिंस्तेन तत्पूजा प्रशस्यते य
द्यपि कस्यचित्केन दीक्षा विहिता न ततः वैष्णवस्याप्यभावे तु नाममंत्रैर्भवेद्ध्रुवं अ
ष्टम्यां चैत्रमासस्य शुक्लपक्षे जितेंद्रियः दंतधावनपूर्वं तु प्रातः स्नायाद्यथाविधिः
नद्यां तडागे कूपे वा ह्रदे प्रस्रवणे तथा ततः संध्यादिकं कुर्यात्स्मरन्रामं च राघवं हृदि गृ
हमागत्य विप्रांस्तान् कुर्याद्दीपासनादिकं दानं कर्तुं विनीतं विप्रं वेदशास्त्ररतं सदा श्री
रामपूजानिरतं सुशीलं दंभवर्जितं विधिज्ञं राममंत्राणां राममंत्रैकसाधकं
आहूय भक्त्या संपूज्य प्रणयात्प्रार्थयेद्व्रती श्रीरामप्रतिमादानं करिष्येहं द्विजोत्त
म तत्राचार्यो भव प्रीतः श्रीरामोपि त्वमेव च इत्युक्त्वामर्चयेदिष्टं स्नापयित्वा ततः स्व
यं तैलेनाभ्यंगपूर्वं स्नायाच्छुचिर्यतः राघवं हृदि स्वेतांबरधरः स्वेतगंधमाल्यानि धारयेत्

रा०
पू०
२

2

अर्चितो भूषितश्चैव कृतमाध्याह्निकक्रियः आचार्यं भोजयेत्सम्यक् सात्विकान्नैः सवि
स्तरं ॥ संजीनस्त्वयमप्येवं हरिनाममनुस्मरन् नवम्यामेकभक्तेन अष्टम्यां तेन राघव ॥ इक्ष्वा
कुवंशतिलक प्रीतो भव रघूत्तम ॥ इत्येकभक्तनिवेदनमंत्रः एकभक्तं ततः नवम्यां शुद्धे
नान्नकथ्या ह्यानरे माहेशहृष्टनमप्येकनेव एकभक्तव्रतीतत्र सहाचार्यो जितेंद्रियः
सुप्तएव ज्ञामकर्णादिग्यामहः पोषं नयेत्तुने सायंसंध्यादिकाः कुर्यात्क्रियारामम नु
स्मरन् आचार्यसहितोरात्रावथ शायी जितेंद्रियः स्वपेत्स्वयं तत्रैकांते श्रीरामार्पि
तमानसः आचार्यं करणे शांतः स्वयं भक्त्या स्वयेत्स्वयं ॥ इत्यष्टमीकृत्यं अथ नवमीकृ
त्यं तत्रैव ततः प्रातः समुत्थाय स्नात्वा संध्यां विधाय च प्रातः सर्वाणि कर्माणि शीघ्र
मेव समापयेत् उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव तेन प्रीतो भव त्वं वै संसारा
त्राहि मां हरे ॥ इत्युपवासनिवेदनमंत्रः ततः स्वस्थमनो भूत्वा विद्वद्भिः सहितो नर

स्वगृहे चोत्तरे भागे यागमंडपमारभेत् चतुर्द्वारं पताकाढ्यं सवितानं सुशोभनं
मनोरमं महोत्सौ पंचवर्णाद्यैः समलंकृतं शंखचक्रहनूमद्भिः प्राग्द्वारे समलंकृतम्
गृहतल्पधनुर्बाणैश्च दक्षिणे समलंकृतं गदाखड्गांगकैश्चैव पश्चिमे समलंकृतं प
द्मस्वस्तिकमानैश्च कौबेरे समलंकृतं मध्ये हस्तचतुष्काद्यं वेदिकां तु कमायतं विचि
त्रवस्त्रगीतैश्च वाद्यैश्च बहुसंयुते पुण्याहं वाचयेत्तत्र विप्रैर्वेदविद्भिः प्रीतमानसैः तत्र सं
कल्पयेद्देवं राममेव मनुस्मरन् अस्यां रामनवम्यां तु रामायणोक्तमरः उपोष्याहं
स्वयामेषु पूजयित्वा यथाविधि इमां स्वर्णमयीं रामप्रतिमां संप्रयत्नतः श्रीरामप्री
तये दास्ये रामभक्ताय धीमते प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे अनेकज
न्मसंसिद्धान्यभ्यस्तानि महान्ति वै इति त्रिभिः प्रतिमादाने संकल्पः शक्ताशक्तामश
क्तस्य प्रतिनिर्माणमुच्यते ततः स्वर्णमयीं रामप्रतिमां पलमानतः निर्मितां द्विभु

रा॰ जोदित्यंवामांकस्थितजानकीं विभ्रतींदक्षिणकरेणज्ञानमुद्रांमहामते वामेना
पू॰ न्यकरेणगदेवीमालिंग्यसंस्थितो सिंहासनेराजतेत्रयपलद्वयविनिर्मिते प्रश
१ कीयोमहाभागतस्याविनावसरतः पलेनार्द्धेनतदर्द्धेनतदर्द्धार्द्धेनवापुनः ततोप्य
शक्तोयथाशक्तिकारयेद्वसुनंदनं लोहेननिर्मितंकुर्याच्छिलायांदारुणापिवा यद्वा
लेख्यंविलेख्यंवामांतरंकगतंहरिं कोमलांगंविशालाक्षमिंद्रनीलमणिप्रभं दक्षि
णांगंदशरथपुत्रान्वेषणतत्परं पृष्ठतोलक्ष्मणंदेवंससहस्तंत्रेसवामरं पार्श्वेभर
तशत्रुघ्नौतालवृंतकराबुभौ अग्रेव्यग्रंहनूमंतंरामानुग्रहकांक्षिणं विभीषणा
समकुसेवमूर्तिंकुर्याद्यथावतः प्रतिमाविशेषःकौसल्यभैङ्गोमघः प्रसूता
कौशल्यांपितरंभ्रातृभिःसह सुवर्णेनरूप्यकुर्याच्छ्रीरामंसीतयासह लक्ष्मणा
द्याःसहपात्राः रजयित्वायथाविधि सहेत्यनेनश्रीरामंवामांकस्थितजानकीं

ते ग्रतपवेंदिकायां ततः स्वर्णमयीमित्यादिना प्रतिमानिर्माणमिश्रशृक्र
मिति भविष्ये विभवे सति यो मोहात्तत्कुर्याद्विधिविस्तरं ततः फलमवाप्नोति देव
द्वाद्विसङ्ख्याते इति मूर्तिलक्षणं ग्रामनापरिमं विष्टपस्यां सजलं विधाय च शेखेश
हृज्ञेयदग्येगं पञ्चाशत्तत्तादिभिः कलशं वामभागस्य पूजाद्याणि चादरात् पात्रं
च प्रोक्षयेदस्त्राचात्मानमेवं प्रपूजयेत् विलिखेत्सर्वतोभद्रं वेदिकोपरि संवृतं तिर्य
गूर्ध्वगता रेखाः कुर्यादेकोनविंशति खेडडः त्रिपदाः कोणे शृंखलापंचकोष्ठिकैः प
कादशपदा वल्ली भद्रं तु नवभिः पदैः चतुर्विंशत्पदा वापी परिधिर्विंशतिः पदैः म
ध्ये षोडशभिः कोष्ठैः पद्मं चाष्टदलं स्मृतं सितेंडः शृंखला कृष्णा वर्णानीलोनहरिता
भद्रा रक्तासिता वाप्यः परिधिः पीतवर्णकः वाह्यं तु रक्तं दलं श्वेता कर्णिका पीतवर्णिका
खेडेडङ्शृंखला वापी वल्ली भद्रं तु पंचमं परिध्याविष्टितं पद्मं वाह्ये सत्त्वरजस्तमः स

ग. पु. ५

वेष्टितेसमृद्धिदं सर्वतोभद्रमंडले मध्येब्रह्माणमष्टास्तुदिक्षुसोमाधिदेवताः वायु
सोमयोर्मध्येरुद्रानेकादशैवतु इंद्रेशानयोर्मध्ये आदित्यान्द्वादशैवतु इंद्राग्नि
मध्येचतथाअश्विनौपूजयेत्तथा आग्नेययमयोर्मध्येविश्वान्देवान्सपन्नकान् या
म्यनैर्ऋतयोर्मध्येसप्तयक्षांस्तुकारयेत् नैर्ऋतजलयोर्मध्येनागभूतांस्तुकारयेत् आ
प्यवायव्ययोर्मध्येगंधर्वाप्सरसःक्रमात् ब्रह्मसोमयोर्मध्येरुद्रानेवचकारयेत् स्कंद
नंदीवृषंशूलंमहादेवंचकारयेत् ब्रह्मेशानयोर्मध्येदुर्गांविष्णुंतथैवच ब्रह्मा
ग्निमध्येचतथास्वधांचैवप्रपूजयेत् ब्रह्मणोनिर्ऋतेर्मध्येगणायंतुप्रपूजयेत् वरु
णब्रह्मयोर्मध्येअपःसंप्रपूजयेत्तथा मध्येवायोर्ब्रह्मणश्चमहतःसंप्रपूजयेत् ब्रह्म
णःपादमूलेतुमेदिनींतत्रकारयेत् कावेरीनर्मदाचैवयमुनाचसरस्वती गंगाकृष्णा
तथागोदासप्तप्राप्ताचसागराः नारतीरमयुतसर्पिर्मैरेयदधिसंभवाः ब्रह्माजन्ताम

मितान्येभिर्मंत्रैः स्थाप्यास्तद्देवताः गंधपुष्पादिभिः पूजयेद्दीपान्दद्याच्च सर्वतः स
र्वतोभद्रं यस्मात्तस्मात्सर्वतोभद्रमुच्यते इति सर्वतोभद्रं अथ मंडले तत्तन्मंत्रेण तत्तद्दे
वतास्थापनपूजाप्रयोगः तत्र मध्ये ब्रह्माणं ब्रह्मजज्ञानं गौतमवामदेवो ब्रह्मात्रि
ष्टुप् ब्रह्मस्थापने पूजने विनियोगः एवमग्रेपि ब्रह्मजज्ञानं उदीचीमारभ्य वायवी
पर्यंतं सोमादयो वायव्यंता अष्टौ लोकपाला स्थापनीयाः तत्र आप्यायस्व गौतमः सो
मो गायत्री ॐ आप्यायस्व समः अभित्वाथीगातिः शुनःशेप ईशानो जगती अभित्वा
देवसवितः इंद्रं वो मधुच्छंद इंद्रो गायत्री ॐ इंद्रो वो विश्वतः ॐ अग्निं कोण्वो मेधा
तिथिरग्निर्गायत्री अग्निंदूतं यमाय सोमं यमो यमोऽनुष्टुप् यमाय सोमं मो षु णो
घोरः काण्वो निर्ऋतिर्गायत्री — मोषुणः तत्त्वायामि शुनःशेपो वरुणस्त्रिष्टुप् ॐ
तत्त्वायामि वायो शतं गौतमो वायुरनुष्टुप् वायो शतं वायुः सोम मध्ये अष्टौ वसव न

रा.
सू.
५

यायत्रमैत्रावरुणौर्वसिष्ठोवसवसिष्टुप् जामयाग्रत्रसोमेशान् मध्येएकादशरुद्रा
न् आरुद्रासः यणावाथएकादशरुद्राजगती गैंग्राहद्रासः ईशानेंद्रमध्येद्वादशादि
त्यान्त्यात्रसोमंदेवमन्यामैत्रावरुणौर्मौत्योवावहृवोवामनस्यात्तपयः द्वादशादित्या
गायत्री गैंमान्त्रुत्तयान् इंद्राग्निमध्ये अश्विनाराज्ञगणौगौतमोश्विनाउसिक् गैंग्र
श्विनावर्तिः अग्नियममध्ये विश्वेदेवान्सपैत्रकान् ओमासोमपञ्छंदाविश्वेदेवागाय
त्री गैंमासः यमनिर्ऋतिमध्ये सप्तयज्ञान् अभित्यदेवंवामदेवासप्तयज्ञाप्रहु।
तिः अभित्यंदेवंसवितारमोण्योःकविक्रतुमर्चामि सत्यसवरत्नधामभिप्रियंम
तिंकविम्नूर्धायस्यामतिर्भा अदि द्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृ
पास्वः निर्ऋति वरुणमध्ये भूतेनागान् आयंगौःसार्पराज्ञीसर्पागायत्री ३ आयंगौः
वरुणवायुमध्ये गंधर्वाप्सरसः अप्सरसानरशानमांगंधर्वाप्सरसोनुष्टुप् गैंग्रप्सर

मांगंपर्वाणोयतस्व्रमग्रेथेषु ग्रामरसामैतत्शास्त्रछ्यंशुंगारस्त्रकंतत्सावानुष्टुमविरो
पाक्षुपेत्स्य ब्रह्मसोममध्ये स्कंदंनंदीश्वरमूलमहाकालान् कुमारं कुमारस्कंद त्रिष्टुप्
उकुमारंमाः ऋषभंऋषभोवैराजाऋषभोनुष्टुप् ॐऋषभंमावलेणानमध्येरत्नारी
न्समग्रदितिर्लोको बृहस्पतिर्देवतानुष्टुप् प्रदितिर्यजतिष्ठब्रहोबमध्ये३ नाम
ग्निवर्णो सोमावित्रुमोत्रिष्टुप् ॐनामग्निवर्णो रुद्रंविश्वः कापवोमथानिथिविस्त्रगा।
यत्री ॐरुद्रंविश्वविं· ब्रह्माग्निमध्येस्वधा उदीरतांशंखः स्वधात्रिष्टुप् ॐउदीरतमवर
नमवरउत् ब्रह्मयममध्येमत्स्यरोगान् परंमृत्योः संकुसुकोमत्स्यरोगास्त्रिष्टुप् ॐपरं
मृत्योग्रनुपरेहिव्रह्मनिर्ऋतिमध्येगणपतिंगणानांत्वा गृत्समदोगणपतिर्जगति ॐग
णानांत्वा ब्रह्मवरुणमध्येआपः शन्नोदेवीरंबरीषः सिंधुद्वीपोगायत्री शन्नोदेवीः
ब्रह्मवायुमध्येमरुतःमरुतोयस्य राहूगणोमरुतोगायत्री ॐमरुतोयस्यब्रह्मणः

आंश्रीअनंतस्यप्राणाइहप्राणाः ॐआंह्रींक्रौंअनंतस्यजीवइहस्थितः ॐआंह्रींक्रौंआंश्रीअनंतस्य
सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणपाणिपादपायूपस्थानीहागत्यसुखं।
चिरंतिष्ठंतुस्वाहा अस्मिनीते· चत्वारिवाक्परिमितापदानि तानिविदुर्ब्राह्मणायेमनी
षिणः गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्याः वदंति गर्भाधानादिसंस्कारा
सिध्यर्थंपंचदशप्रणवावृत्तीःकरिष्ये रक्तांबोधि· पराग: अथानंतपूजा ततस्तुमूलमं
त्रेणनमस्कृत्यजनार्दनं नवाम्रपल्लवाभासंपिंगभ्रूश्मश्रुलोचनं पीतांबरधरंदेवंशंखच
क्रगदाधरं अलंकृतंसमुद्रस्थंविश्वरूपंविचिंतये ध्यायामि आगच्छानंतदेवेशतेजो

प्र. पू. ८

गशेजगत्पते इमां मया कृतां पूजां गृहाण पुरुषोत्तम ॐ सहस्रशीर्षा पुरुषः सहस्रा
क्षः सहस्रपात् स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशांगुलं वामकरे आवाहनं ना
नारत्नसमायुक्तं कार्तस्वरविभूषितं आसनं देवदेवेश गृहाण पुरुषोत्तम ॐ पुरुष
एवेदं सर्वं यद्भूतं यच्च भाव्यम् उतामृतत्वस्येशानो यदन्नेनातिरोहति दक्षिणकरे
आसनं गंगादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृ
ह्यतां एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं
दिवि वामपादे पाद्यं अनन्तानन्त देवेश अनन्तफलदायक अनन्तानन्तरूपोसि गृहाण
अर्घ्यं नमोस्तु ते त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो विष्वङ्व्यक्रामत्साशनान न
शने अभि दक्षिणपादे अर्घ्यं गंगोदकं समानीतं सुवर्णकलशे स्थितं आचम्यतां हृ
षीकेश प्रसीद पुरुषोत्तम ततो विराडजायत विराजो अधि पूरुषः स जातो अत्यरिच्य

तपश्चाद्भूमिमथोत्तरः वामजानुदेवे आचमनीयं अनंतगुणरूपायविष्णुरूपधराय
च नमोमहात्मदेवायअनंतायनमोनमः तस्माद्यज्ञात्सर्वहुतः संभृतंपृषदाज्यं
पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये दक्षिणजानुदेवे स्नानं ततःपंचामृतस्ना
नं सुरभेस्तुसमुत्पन्नंदेवानामपितृप्तिदं पयोददामिदेवेश स्नानार्थंप्रतिगृह्यतां
ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं भवावाजस्यसंगथे पयस्नानं चंद्रमंडल
संकाशंसर्वदेवप्रियंहियत् ददामिदधिदेवेशस्नानार्थंप्रतिगृह्यतां दधिक्राव्णो
अकारिषंजिष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्रणआयूंषितारिषत्
दधिस्नानं आज्यंसुराणामाहारआज्यंयज्ञेप्रतिष्ठितं आज्यंपवित्रंपरमंस्नानार्थंप्रतिगृ
ह्यतां घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतंम्वस्यधाम अनुष्वधमावहमादयस्व
स्वाहाघृतंवृषभवक्षिहव्यं घृतस्नानं सर्वौषधिसमुत्पन्नंपीयूषसदृशंमधु स्नानाय

पु. नेमयादत्तं गृहाण परमेश्वर मधुवाता ऋतायते मधुक्षरंति सिंधवः माध्वीर्नः संत्वोष
पू. धीः मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधुद्यौरस्तु नः पिता मधुमान्नो वनस्प
८ तिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतु नः मधुस्नानं इक्षुदंडसमुद्भूता शर्करा मधु
रा शुभा स्नानायतेमयादत्ता गृहाण परमेश्वर स्वादुःपवस्व दिव्याय जन्मने स्वादुरिंद्रा
य सुहवीतुनाम्ने स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमां अदाभ्यः शर्करा
स्नानं पुनः इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांशुरे शुद्धस्नानं
नाममंत्रैः पूर्ववज्जोजयेत् पुरुषसूक्तेनाभिषेकः तप्तकांचनवर्णाभं कौशेयं वस्त्र
निर्मितं वस्त्रं गृहाण देवेश लक्ष्मीयुक्त नमोस्तु ते तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि
जज्ञिरे छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत वस्त्रं दामोदर नमस्ते त्राहि मां
भवसागरात् ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम तस्मादश्वा अजायंत ये के चोभया

दतः गावोह यज्ञिरे तस्मात्तस्माज्जाता अजावयः इत्तिणाकृतौ यज्ञोपवीतं श्रीखं
डंचंदनं दिव्यं गंधाढ्यं सुमनोहरं विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यतां तं यज्ञं बर्हिषि
प्रौक्षन्पुरुषं जातमग्रतः तेन देवा अयजन्त साध्या ऋषयश्च ये नाभौ गंधं ॐ अक्षताश्च
सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः मया निवेदिता भक्त्या गृहाण परमेश्वर अक्षतन्नमीमे
दतह्यव प्रियाअधूषत स्वभानवो विप्रा नविष्टया मती योजान्विंद्र इनेहरि अक्षतां मा
ल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो मयाहृतानि पूजार्थं प्रीत्यर्थं प्रतिगृह्यतां
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्यते
हृदयाय पुष्पाणि अथयंत्रशिरसा श्रियैनमः मोहिन्यैनमः पद्मिन्यैनमः महाबला
यैनमः अनंतायैनमः मंगलायैनमः वरदायैनमः शुभायैनमः जयायैनमः विजया
यैनमः जयंत्यैनमः पापनाशिन्यैनमः विश्वरूपायैनमः सर्वमंगलायैनमः १४ १

अ॰
पू॰
९

निवेदयित्वा अथांगपूजा मत्स्यायनमः पादौ पूजयामि कूर्मायनमः गुल्फौ पूजया
मि वराहायनमः जानुनी पूजयामि नारसिंहायनमः ऊरू पूजयामि वामनायनमः
कटिं पूजयामि रामायनमः उदरं पूजयामि श्रीरामायनमः हृदयं पूजयामि कृष्णाय
नमः मुखं पूजयामि सहस्रशिरसेनमः शिरः पूजयामि श्रीमदनंतायनमः सर्वांगं पू
जयामि अथावरणपूजा अनंतस्य दक्षिणपार्श्वे रमायैनमः वामपार्श्वे भूम्यैनमः इ
ति प्रथमावरणं आवरणदेवतानामावाहनस्थानप्रतालः गंधपुष्पाक्षतजलैर्मध्यमांगुष्ठै
र्धृत्वा मध्ये शंखोदकं गृहीत्वा मंत्रांते शंखोदकं भूमौ निक्षिप्य अंगदेवोपरि निक्षिपेत्
दयाब्धे त्राहि संसारसर्पान्मां शरणागतं भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं इति
मंत्रमुच्चार्य जलेनस्वकादेवोपरि निक्षिपेत् एवमग्रेऽपि पूर्वादिक्रमेण हृद्धोल्कायनमः महो
ल्कायनमः शतोल्कायनमः सहस्रोल्कायनमः दयाब्धेत्रायनमः द्वितीयावरणं २

तथैव वासुदेवायनमः संकर्षणायनमः प्रद्युम्नायनमः अनिरुद्धायनमः दयाव्ये
नमः तृतीयावरणार्चनं १ प्राच्यां केशवायनमः नारायणायनमः माधवायनमः
गोविंदायनमः विष्णवेनमः मधुसूदनायनमः त्रिविक्रमायनमः वामनायनमः श्रीध
रायनमः हृषीकेशायनमः पद्मनाभायनमः दामोदरायनमः दयाव्येनमः चतुर्थावर
णार्चनं पूर्वादिक्रमेण मत्स्यायनमः कूर्मायनमः वराहायनमः नारसिंहायनमः वा
मनायनमः रामायनमः श्रीरामायनमः कृष्णायनमः बौद्धायनमः कल्किनेनमः
अनंतायनमः विश्वरूपिणेनमः दयाव्येशायनमः पंचमावर॰ ९ पूर्वादिक्रमेण अनं
तायनमः दक्षिणायां ब्रह्मणेनमः पश्चिमायां वायवेनमः उत्तरायां ईशानायनमः
आग्नेय्यां वारुण्यैनमः नैरृत्यां गायत्र्यैनमः वायव्यां भारत्यैनमः ईशान्यां गिरिजायैनमः
अग्नेगरुडायनमः वामेलक्ष्मणायनमः दयाव्येशादि॰ षष्ठमावरणार्चनं ९ पूर्वादि

अ. क्रमेण इंद्रायनमः अग्नयेनमः यमायनमः नैर्ऋतयेनमः वरुणायनमः वायव्येनमः सो
ए. मायनमः ईशानायनमः दद्यार्घ्ये० सप्तमावर० ७ आग्नेय्यां शेषायनमः नैर्ऋत्यां विश्ववेन
९० मः वायव्यां विधयेनमः ईशान्यां प्रजापतयेनमः दद्यार्घ्ये० अष्टमावर० ८ आग्नेय्यां गणप
तयेनमः नैर्ऋत्यां सप्तमातृभ्योनमः वायव्यां दुर्गायैनमः ईशान्यां क्षेत्राधिपतयेनमः दद्या
र्घ्ये० नवमावरण० ९ मध्ये ब्रह्मणेनमः भास्करायनमः शेषायनमः सर्वव्यापिनेनमः
10 ईश्वरायनमः विश्वरूपायनमः महाकामायनमः सृष्टिकर्त्रेनमः कृष्णायनमः हरये
नमः शिवायनमः स्थितिकारकायनमः अंतकायनमः दद्यार्घ्ये० दशमावर० १० शौरये
नमः वैकुंठायनमः महाबलायनमः पुरुषोत्तमायनमः अजायनमः पद्मनाभायनमः
मंगलायनमः हृषीकेशायनमः वरदायनमः माधवायनमः मधुसूदनायनमः अच्यु
तायनमः अनंतायनमः गोविंदायनमः विजयायनमः अपराजितायनमः कृष्णायन

मः ध्यात्वेज्ञा० एकादशावर० ११ अनंतायनमः कपिलायनमः शेषायनमः संकर्ष
णायनमः हलायुधायनमः नारायणायनमः सीरपाणयेनमः बलभद्रायनमः ध्या।
त्वे० द्वादशावरणा० क्षीराब्धिशायिनेनमः अनंतायनमः भूम्याधारायनमः लोकना
थायनमः फणामणिविभूषणायनमः सहस्रमूर्ध्नेनमः सहस्रार्चिषेनमः ध्यात्वे०
त्रयोदशावर० १३ केशवादिचतुर्विंशतिनामभिः ध्यात्वेज्ञा० इतिचतुर्दशावरणार्चनं १४
अथपत्रपूजा कुशलायनमः पलाशपत्रंपूजयामि विश्वेनमः औदुंबरपत्रंपूजयामि हर
येनमः अश्वत्थपत्रंपूजयामि शंभवेनमः भृंगिराजपत्रंपूजयामि ब्रह्मणेनमः जटाधार
पत्रंपूजयामि भास्करायनमः अशोकपत्रंपूजयामि शेषायनमः कपित्थपत्रंपूजयामि
सर्वव्यापिनेनमः वटपत्रंपूजयामि ईश्वरायनमः आम्रपत्रंपूजयामि विश्वरूपिणेनमः क
दलीपत्रंपूजयामि महाकायायनमः अपामार्गपत्रंपूजयामि सृष्टिकर्त्रेनमः करवीरप

अ· त्रेण पूजयामि स्थितिकर्त्रे नमः पुन्नागपत्रेण पूजयामि अंतकाय नमः नागवल्लीपत्रेण पू-
पू· जयामि १४ अथ पुष्पपूजा अनंताय नमः पद्मपुष्पं विष्णवे नमः जातीपुष्पं अच्यु-
॥ ताय नमः कल्हारपुष्पं· सहस्रजिते नमः केतकीपुष्पं· अनंतरूपिणे नमः बकुलपु-
ष्पं· इष्टाय नमः शतपुष्पं· विशिष्टाय नमः पुन्नागपुष्पं शिष्टेष्टाय नमः करवीरपुष्पं·
शिखंडिने नमः धत्तूरपुष्पं नहुषाय नमः कुंदपुष्पं· विश्वबाहवे नमः मल्लिकापुष्पं·
महीधराय नमः मालतीपुष्पं· अच्युताय नमः कर्णिकापुष्पं अंतकाय नमः कदलीपुष्पं १८
अथाष्टोत्तरनामभिः पूजा अनंताय नमः अच्युताय नमः अद्भुतकर्मणे नमः अमितवि-
क्रमाय नमः अपराजिताय नमः अखंडाय नमः अग्निनेत्राय नमः अग्निवपुषे नमः अ-
हरणाय नमः अखिपु· ए अनंतफलाय नमः अनाथिने नमः अनघाय नमः अदृशीलाय
नमः अहरहाय नमः अप्रकृतये नमः अनिरुद्धाय नमः अनिर्दिष्टाय नमः अबलाय नमः

शाखातिगायनमः २० अचलरूपायनमः अखिलपरायनमः अव्यक्तायनमः अरू
रूपायनमः अभयंकरायनमः अनन्तायनमः अवधूतेनमः अयोनिजायनमः अर
विंदाक्षायनमः अघनवर्जितायनमः ३० अधोक्षजायनमः आदिरूपायनमः अविका
पतिपूर्वजायनमः अपस्मारनाशिनेनमः अव्ययायनमः अनादयेनमः अप्रमेयायन
मः अघशत्रवेनमः अमरारिघ्नायनमः अनीश्वरायनमः ४० अजायनमः अघोरायनमः
अनादिनिधयेनमः अमरप्रभवेनमः अग्राह्यायनमः अक्रूरायनमः अनुत्तमायनमः
अरूपायनमः अङ्गेनमः अमोघाधिपतयेनमः ५० अजायनमः अन्तमायनमः अमृता
यनमः अघोरवीर्यायनमः अलंगायनमः अविघ्नायनमः अतीन्द्रियायनमः अमितते
जसेनमः अमितयेनमः अष्टमूर्तयेनमः ६० अनिलायनमः अवशायनमः अणोरणी
यसेनमः अशोकायनमः अरविंदाक्षायनमः अधिष्ठायनमः अमितननयायनमः अ

अ. पू. १२

रण्यवासिनेनमः अप्रमत्तायनमः अनंतरूपायनमः अनलायनमः अनिमिषाय
नमः अस्त्ररूपायनमः अग्रगण्यायनमः अप्रमत्तायनमः अनंतकायनमः अचिंत्या
यनमः अपांनिधयेनमः अतिरुद्रायनमः अमरप्रियायनमः ८० अष्टसिद्धिप्रदायन
मः अरविंदप्रियायनमः अरविंदोद्भवायनमः अनयायनमः अर्थ्यायनमः अक्षोभ्याय
12 नमः अविघ्नेनेनमः अनेकमूर्तयेनमः अनंतब्रह्मांडपतयेनमः अनंतशायनायनमः ९.
अमराधिपतयेनमः अनाधारायनमः अनंतनाम्नेनमः अनंतश्रियेनमः अच्युताय।
नमः अमायायनमः आश्रमस्थायनमः आश्रमातीतायनमः अज्ञानादायनमः आत्म
योनयेनमः १०० अवनीपतयेनमः अवनीधरायनमः अनादयेनमः आदित्यायनमः
अमृतायनमः अपवर्गप्रदायनमः अव्यक्तायनमः अनंतायनमः इतिअष्टोत्तरशतना
मपूजा दशांगगुग्गुलधूपंनैवेद्यनागरुसंयुतं सर्वेषामनमस्पपरहारणस्मरसन्निन आ

ह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत
कैवे श्यः साज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया दीपं गृहाण देवेश त्रैलोक्यतिमि
रापह चंद्रमा मनसो जातश्चक्षोः सूर्योः अजायत श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत
दीपः अन्नं चतुर्विधं स्वादु पयो दधि घृतैर्युतं नानाव्यंजनशोभाढ्यं नैवेद्यं प्रतिगृह्यतां चं
द्रमा मनसो· नैवेद्यं मध्ये पानीयं उत्तरापोशनार्थं मे दत्तं तोयं सुवासितं गृहाण सुमुखो
भूत्वा अन्नेनायं नमो नमः उत्तरापोशनं मुखप्रक्षालनं हस्तप्रक्षालनं करोद्वर्तनकं
देव मया दत्तं हि भक्तितः चारु चंद्रप्रभं दिव्यं गृहाण जगदीश्वर करोद्वर्तनं इदं फलं
मया देव स्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि नारिकेलफलं
पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं कर्पूरैलासमायुक्तं तांबूलं प्रतिगृह्यतां इति
तांबूलं· हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रय

अ. ह्रीमे हिरण्यगर्भः समवर्तताग्रेभूतस्यजातःपतिरेकआसीत् सदाधारपृथिवीं
पू. द्यामुतेमांकस्मैदेवायहविषाविधेम दक्षिणा यानिकानिचपापानिजन्मांतर
१२ कृतानिच नानितानिविनश्यंतिप्रदक्षिणापदेपदे सप्तास्यासन्परिधयस्त्रिःसप्त
समिधःकृताः देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुम् प्रदक्षिणा नमस्तेभगवन्भू
योनमस्तेधरणीधरः नमस्तेसर्वनागेंद्रनमस्तेमधुसूदन नमस्तेदेवदेवेशनम
स्तेगरुडध्वज नमस्तेकमलाकांतअनंतायनमोनमः यज्ञेनयज्ञमयजंतदेवास्ता
निधर्माणिप्रथमान्यासन् तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः
इतिमंत्रपुष्पं अथदोरकप्रार्थना अनंतायनमस्तुभ्यंसहस्रशिरसेनमः नमोस्तु
पद्मनाभायनागानांपतयेनमः अनंतःकामदःश्रीमाननंतोमेप्रयच्छतु अनंतोउर
रूपेणपुत्रपौत्रान्प्रवर्धतु इतिप्रार्थ्यदोरकंगृहीत्वा अथदोरकबंधनमंत्रः अनंतसं

सारमहासमुद्रमग्नेसमभ्युद्धरवासुदेव अनंतरूपेविनियोजयस्वह्यनंतसूत्राय
नमोनमस्ते अथजीर्णडोरकविसर्जनमंत्रः नमःसर्वहितानंतजगदानंदकार
क जीर्णदोरमुद्देवविसृजेहंत्वदाज्ञया इतिविसृजेत् अथवायनमंत्रः गृहाण
इदंद्विजश्रेष्ठवायनंदक्षिणायुतं त्वत्प्रसादादहंदेवमुच्येयंकर्मबंधनात् प्रतिगृह्णा
द्विजश्रेष्ठअनंतफलदायक पक्वान्नफलसंयुक्तंदक्षिणाघृतसंयुतं वायनंद्विजव
र्यायदास्यामिव्रतपूर्तये अथजीर्णडोरकदानमंत्रः अनंतःप्रतिगृह्णातिअनंतोवै
ददातिच अनंतस्तारकोभाभ्यामनंतायनमोनमः इतिदद्यात् ततोयथाशक्तिब्रा
ह्मणान्भोजयित्वा अनेनकृतपूजनेनश्रीमदनंतःप्रीयतां इतिअनंतपूजाविधिः
समाप्तम् ॥

आश्विनशुक्लपौर्णिमा प्र १ पौर्णिमा ह मा

आ॰ प॰ १

ॐ श्रीगणेशायनमः आश्विनेपौर्णमासीन्तुमासान्तेऽयते तत्रादौसप्तवर्णंघृतपूर्णं
कांस्यपात्रदाने मत्स्यपुराणे आश्विनेपंचदश्यांतुयोदद्याद्धेमसंयुतं पर्यन्तंसिद्धिम
वाप्नोतिपुनरावृत्तिदुर्लभां हेमसंयुतंघृतपूर्णंकांस्यपात्रंदद्यादित्यर्थः तथाचवि
ष्णुधर्मोत्तरे आश्वयुज्यांकांस्यपात्रंघृतपूर्णंद्विजातये सप्तवर्णंतथादत्वादीप्तांग।
स्त्वभिजायते अत्राश्विनीयोगोनविवक्षितः तथाचानेनतरे पौर्णमासीषुसर्वासुमा
सर्क्षसहितास्वेव एतेषामेवदानानांफलंदशगुणंभवेत् महत्स्वीमहचैतासुफ
लमक्षयमश्नुते महत्स्वीमहश्पेतेसहितौचेन्दुगीष्पती तत्रदानोपवासादिचाक्ष
यंपरिकीर्तितमिति विष्णुवचनेनलक्षितौसहितौमासनक्षत्रनिमित्तसंज्ञौ एत
त्तुपौर्णमासीसाधारणमेवबोध्यं तथैतस्मिन्शुक्लपक्षेदशम्यादिपौर्णमास्यन्त
तिथिषुनवान्नेष्टिविधानंतत्राश्विनाधिकारे ब्रह्मपुराणे शुक्लपक्षेनवधान्यपक्वं

ज्ञात्वा स्वशोभनं स्वतिथौ च सन्नते च मुहूर्ते च शुभे सति गच्छेत्क्षेत्रे विधानेन तत्रस
वाग्यतः स्वरः तत्रैव वह्निं प्रज्वाल्य धान्यैः सम्मील्य शालिवित् स्वगृह्योक्तविधानेन
पूर्णां कुर्याद्धविषा ततः होमं कृत्वा ततः पश्चान्नयेद्धान्यं विभूषितं पुष्पैर्विविधैः फलैर्मूलै
र्हृद्यैः स्वस्थ संयुतैः तेन देवान्पितॄंश्चैव सम्यक्संतर्पयित्वा यथाक्रमं विभज्याद्य यथाशक्त्या
देवतानां समर्पयित्वा ततः नववस्त्रावृतः स्रग्वी स्वनुलिप्तैः स्वलंकृतः स्थितः सर्वेषु सर्वत्र
शोभनं च तथा वाग्यतः स्वरः शृणुयान्महदवरं सुशोभं मंगलानि च भवादिमान् शङ्खभेर्यादि निस्वनं।
शुक्लं नवं विशुद्धं विभिन्नं पितॄणां निर्व्रीहिपाकसमये व्रीहिभिः श्राद्धं कुर्याद्विमर्थ्यैः
हारितलोष्ठाहृत् शृणु मे धीमन्तयोः व्रीहिपवाभ्यां यजेत वनीवर्षाश्वयणमाके शृहीर
हस्य वनीवानप्रस्थः वर्षाश्रयाश्वयणं प्रकल्पते श्रेष्ठवश्राद्धं पार्वणं नित्यं व्रीहिप
वपाकौ वेति विस्तरेणानिमप्रकरणेपठनात् श्रेष्ठवनवैर्व्रीहिभिर्मलदभावेपुराणैः

आ.
प.
२

स्तदभावे वाऽऽज्ञानैरेव निर्दिष्टैरेव पर्वणि कार्य्यमिति गोभिलसूत्रटीकायां इदमाग्नीध्र
कर्म्मोक्तमाश्वलायनेन अग्न्युत्पन्नामाग्न्युत्पन्नोक्तमेति तत्र एवोक्तव्यापिनी ग्राह्यादेव
कर्म्मत्वात् आग्रयणं तु पर्वणि कार्यं शरद्याग्रयणं यत्तु पर्वणि स्यात्तदुच्यते इति शौ
नकोक्तेः तत्रापि शेषपर्वणि कार्य्यमिति प्रागुक्तं तच्च दर्शेष्ट्याः पौर्णमासेष्ट्याश्च प्रागभ
वति दर्शेष्ट्याः एवं च क्रमाग्रयणं शाकौ पौर्णमास्यां च तत् इति दीपकोक्तेः तत्राग्रयणं
त्रेधा व्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणं चेति पूर्वोक्तकालः श्रुतौ ग्रहमेधीव्री
हि पुत्राभ्यां शरद्वसन्तयोर्जयेत् श्यामाकैर्नीवारैर्वेष्टाख्यापकाले विनान्नवान्नेन उ
राणैर्वेति तत्रापि श्यामाकाग्रयणमनित्यमिति केचन अनाहिताग्नेर्नित्यं यवाग्रयणं च
कर्त्तव्यमिति स्मार्त्तानां स्मार्त्तोक्तत्वात् हरेर्व्रीहियवदेवतासंबन्धानामेवं मंत्रेणान्ना
ताच्च आहिताग्नेस्तु यवाग्रयणस्याप्यनित्यत्वं अपि वा क्रियायैवेष्टितिस्मृतात् य

2

हान्त्रीह्याग्रयणेन समानतंत्रता। श्यामाकैस्तु शरत्संस्कुर्यात् यवाग्रयणं यदि वा त-
दपि समानतंत्रमित्यादिना प्रयणस्तनौ परिश्रमवन्तां स्वलभमित्यन्ते। इदं च पर्वा-
भावे देवनतैत्र्कृत्तिकाविशाखांतेकार्यमिति स्मृत्यर्थसारे उक्तं बौधायनीयके शाव-
स्वामिना प्युक्तं यदाश्विनपौर्णमास्यां क्रियेत तदैककालत्वादाश्वयुजेनकर्मणाम्
व समानतंत्रता भवति तदेतत्कृत्तिकानायकवर्हिर्विधाजेति सूत्रे स्पष्टमुक्तं एतदक-
रणे प्रायश्चित्तमुक्तं वेदिकायां कात्यायनः निमयामास येवैववैश्वदेवाहूयस्य व-
श्रनिष्ठान वयत्तेन नवान्नप्राशनेन तथा वैश्वानराय कतमश्च हवैश्वानरो भवेत् कारि-
कापि शरत्कृत्वाग्रयणं चैव नवान्नं यदि वा नरः वैश्वानराय कतमश्चरुः पूर्णाहुतिस्तु
वेति श्रुतिविधानेन समिदारण्यमंत्रं च वषेषवर्षं जपेत्ततः आग्रयणीयस्याश्मंतदाम-
हरेणमेतितितदिस्म्युक्तं एतत्पापदिमलमासे च कर्तव्यमसमयानेति प्राप्तउक्तं प्रमोष्या

श्री॰
पं॰
१

ह्रिताग्न्यादिविशेषः शौनकोद्दैतीयः ब्रह्मपुराणे आख्युसं सा बालकायां निकुंभो वा
लकाणिवान् आयाति मेनयासां हेमकुंवापुंढं मदाकणं तस्मात्तत्र नैरर्मागाः स्वरू
ह्रस्पमभीपगाः शोभिनद्याप्रयत्नेन भूषितयाश्च मंडलेः शुभ्याविफलपुष्पात्र सच्छिव
प्रकैरस्तथा वेश्मानि भूषितयानि नानारंगैश्च सर्वतः सन्तानैरशलिमैश्चनैरभा ।
श्वेतबालकैः दिवानत्रनभोमकं समानुषैश्च विवेकिभिः स्त्रीवृद्धमूर्खबालैश्च भोक्तव्यं
हर्षितैः सदैः पुष्पैश्च सफलैः पात्रैस्तथा द्वारे हेमभित्तिभिः द्वारोपान्ते प्रदीपाश्च संस्कृतो
हव्यवाहनः यवाक्षतहुतोपेतैस्तंडुलैश्च सतर्पितः संस्कृतोत्सवः शौंडुः पयसा पाय
सेनच रुद्रः संभाव्यः संकष्टस्तथानैदीपैश्च पौरुतिः गोमद्भिः सुरभिः पुष्पाद्यागवद्भिर्हि
ताश्रनः शैरभवद्भिर्वक्तोणोगजवद्भिर्विनायकः पुत्रः सांघैश्चैवं तो महाविभवविस्त
रैः ततः पुष्पो निकुंभस्तु समाधिष्ठिते मंडलेः स्वर्णपिभिर्गीतोपेतैः कृपाणैश्च भूरिभिः

ब्राह्मणान्भोजयित्वा तु भोक्तव्यं मांसवर्जितं ततः प्रभातसमये गन्धलिप्तैः स्वलंकृतैः
मंगलालंभनं कार्यं वह्निसंपूजनेन तथा भोक्तव्यं ब्राह्मणैः सार्द्धं क्रीडितव्यं यथासुखं न
भस्याश्वयुजीतायां द्वितीयायामनन्तरं प्रभाते कर्दमाख्ये तु क्रीडितव्यं पिशाचवत् नि
र्जलैस्तथाथ सर्वत्र कर्दमवत्सर्वं विशेषतः स्नानीयवाद्यमिश्रालिलेपनीयानि कर्दमैः का
माग्निजनकैर्नीतैः स्त्रीपुंलिङ्गार्तवादिभिः वाचा पैशाचमार्गाणां कीर्तयद्भिरितस्ततः
तस्मिन्नहनि पूर्वाह्णे निष्क्रमस्यानुपायिनः क्रान्तवेषाः पिशाचास्तु प्रविशन्ति नरांस्तता
न्तु प्रणश्येत्ततः स्नात्वा सायाह्नकाले गच्छेत्तिवेशवत् दर्पाभिमानदोषेण तत्र येनागमाननराः
नरजयंति मोहेन क्रीडनं नैव कुर्वते तान्निर्देहन्ति ते कोपात्पिशाचास्ते सुदर्शनाः
ततः स्नातैर्नरैः पूज्यो देवो दामोदरो हरिः संपूज्य विप्रान्भोक्तव्यमनुलिप्तैः स्वलंकृतैः
वंशमित्रकलत्रैश्च सह भृत्यैर्यथाक्रमं ततः प्रभृति षण्मासान्नेषु वेशमसमानवैः

अ. प. ४

अग्निः सन्निहितः कार्यो राज्ञैस्सिद्धालकस्तथा मांसं समं प्रदेयं स्याद्दीपो निमे शृङ्गाद्
हितिति अस्यामेव पौर्णमास्यां कोजागरव्रतं नारदीये आश्विने मासि पूर्णायां व्र
ते कोजागराभिधे नक्तस्नानो विधानेन सोपवासो जितेन्द्रियः लक्ष्मीमभ्यर्च्य सौव
र्णीं ताम्रे कृष्णाजिने पात्रे मृण्मये वा स्ववस्त्रान्तः उपचारैः पृथग्विधैः ततः सायंतने
काले सुविलिनारकापियैः हेमान्तैः राज्यामृण्मयान्वा घृतदीपान्प्रदीपयेत् लक्षं तद
र्धं सप्तं ते सहस्रं शतमेव वा घृतेन शर्करामिश्रं विपाच्य बहुपायसं वंशपात्रेषु सं
स्थाप्य कौमुद्यां शीतदीधितेः याममात्रे गते रात्रौ लक्ष्म्यै तन्निवेदयेत् ततः संभो
जयेत्तेन विप्रानम्नाशनैः शनैः सहैव जागरं कुर्याद् नृत्यगीतस्तुमंगलैः ततोऽरुणो
दये स्नात्वा तां मूर्तिं गुरवेऽर्पयेत् अस्यां रात्रौ महालक्ष्मीर्वराभयकराम्बुजा निशीथे च
रते नित्यं को जागर्ति महीतले यस्मै वित्तं प्रयच्छामि जाग्रते रजकाय वै वर्षं वर्षं

4

पयोदुग्धं वमसोविकारः
पायसं घृतेन शर्करया च
संवलितं यथा स्यात्तथा
बहुविधा... वंशपात्रे
... यथासंस्थापितं भवेत्
एतेन भावया श्री
पुलाकं मार्यमिति
प्रतिभाति ६

हृतं चैव न द्यूतं न लक्ष्मीप्रबोधनं । सम्यग्दृष्ट्वा महिकीदृग्गोदेहान्ते पारलौकिकीष्विति
तथा च ब्रह्मपुराणे लिंगेपि । आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि । कौमुदी सा
समाख्याता कार्या लोकविभूतये । कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावणस्थितं । सु
गन्धिर्निशि सद्वेषोऽक्षैर्जागरणं चरेत् । तथा निशीथे वरदा लक्ष्मीः को जागर्ति ।
वादिनी । यस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः । नारिकेलैश्च पिष्टकैः । पितृ
देवान् समर्चयेत् बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनी भवेत् मदनरत्ने नारिकेलो
दकं पीत्वाक्षैर्जागरणं निशि । तस्मै वित्तं प्रयच्छामि यो जागर्ति महीतले । इदं
कोजागरव्रतं यद्दिने पूर्णिमा प्रदोषनिशीथोभयव्यापिनी तद्दिने कार्या
यदा तु पूर्वेद्युर्निशीथव्याप्तिरन्यदा पूर्वा । नक्तादिव्रतवदत्र रात्रियोगो विशि
ष्यते इति परेद्युः नक्तादिव्रतयोगेन रात्रियोगो विशिष्यते इति वचनात् लक्ष्मी

ग्रा॰ प॰ ५ पूजामंत्रस्तु नमस्ते सर्वदेवानां वरदासि हरिप्रिये या गतिस्त्वत्प्रपन्नानां सा मे भूया
त्वदर्चनात् इदं पूजामंत्रस्तु विधिर्विष्णेरावतन्स्याय यो लोम्यालिंगिताय च भास्व
त्कलिशहस्ताय सहस्रान्ताय ते नमः यवान्नतन्तूतोपितैरिमंत्रयवानां पूयगुण
दानात् अन्नतनपरेतेदुलविशेषपरं एवमन्नाप्यनुसंधेयं लक्ष्मीद्दष्टानिरिकार्थं
मिमादिक्षरस्पूजनं एवं हे सीहृदयालके त्वभोक्तव्ये पूजितैः हरेरिच्छत्रस्त्रं वा
न्मस्यशर्वाद्गपवेक्षवीतश्मादिवाक्यात् पूजाकर्तव्यतेनभोजनस्यतद्वत्रस्य च
ततः शरीरसौतनोभ्योमलपिस्पंदविलवात् अन्नादीनां प्रवेशाच्च स्यादशुचिर्वि
शेषत इति वाक्यादाचाराश्च प्राप्तेः दिवातत्रन भोक्तव्यमित्यादिनिषिद्धदिवा
भोजनस्त्रीमृत्योदिगोचरत्वयादिवानानन्तमात्रविधौ वाक्यं कालाद्यवेव च अम
यादिवोद्दमित्यादिपूजनेनेदिवानन्तपूजोत्तरकालीनभोजनं च विधेयमिति वा

5

कर्मेदं विशिष्टविधेर्विधिगौरवत्वलक्षणायाः प्रसंगात् नचकालान्तरदीपदान
स्य रात्रिकर्त्तव्यत्वानर्थक्यं भगवत्तत्रकर्त्तव्याह्लादर्शनेन महोत्सवाश्रयत्वेनैव यौगपद्यवि
धानात् अन्येपि रात्रिकर्त्तव्या एवेति वाच्यं नक्तेति पदं नक्तेति एवं प्रक्रान्ताश्वयुजेमात्र
परामर्शस्यावश्यकत्वे नक्तेति पदं तदुपस्थापकमेव लाघवात् एवमाक्रान्ताविच्छेद
घोरवबाधैरवोन्मिश्रैर्नृत्यगीतैश्चशालिना वह्निपार्श्वगतैर्नेयोऽश्वयुग्रात्रिमाहवर्ययात्
रात्रिकालीनत्वेनत्वैः यत्तु कृत्यचतुर्दशपर्णराश्रौ निकुंभादिष्वजादर्शनोद्भावनेनतत्रात्र प
युक्तमेवेति स्कान्देपि अस्तिकोजागरं नाम व्रतानामुत्तमं व्रतं यत्कृत्वा समवाप्नो।
ति नित्यं लोकानन्तुत्तमान् पूर्णिमाश्वयुजे मासि कौमुदी परिकीर्तिता नशारात्र्यम।
हालक्ष्मीमिन्द्रं चैरावणस्थितं उपवासं प्रकुर्वीत दीपान्दद्यात्प्रभक्तितः लक्षं तत्तदर्थम
युतं सहस्रं शतमेव वा घृतेन दीपनेदीपांस्तिलतैलेन वा व्रती रात्रौ जागरणं कुर्यात्

आ. प. ६

मगीतज्वरः मं यथाविभवतोदेयाः श्वेतवीथिप्रदीपिकाः देवनायतनेचैवआरामेषुगृ
हेषुच ततः प्रभातेसंस्नातः संपूज्यचशतक्रतुं ब्राह्मणान्भोजयेन्नारीः घृतशर्करपायसैः
वासोभिर्दक्षिणाभिश्चसंपूज्यान्सर्जयेद्द्विजान् यथाशक्तिचदातव्यारौप्याः स्वर्णविनिर्मि
ताः एवंनिर्वर्त्यविधिवद्व्रतपारणमाचरेत् व्रतस्यास्यप्रभावेनकल्पानेवायुसंख्यकान् अ
प्सरोभिः परिवृतः स्वर्गलोकेमहीयते इहचापुत्रमारोग्यंपुत्रपौत्रादिसंपदः लभतेव्र
तमाहात्म्यात्कलश्रेष्ठंगृणोमंत्र निशीथेवरदालक्ष्मीः कोजागर्तीतिभाषिणी जगत्यमु
मतेतस्यांलोकचेष्टावलोकिनी नालिकेरोदकंपीत्वाअक्षक्रीडांसमाचरेत् तस्मैवित्तंप्र
यच्छामिकोजागर्तिमहीतले इतिस्कांदेआश्विनपौर्णमास्यांकोजागरव्रतं अस्योद्याप
ने तिथ्यादिसंकीर्त्यआत्मनः सकुलस्यच अखंडितलक्ष्मीप्राप्तिपूर्वकसुखादिप्रा
प्तयेश्रीमहालक्ष्मीमहेंद्रयोः प्रीत्यर्थंमाचरितकोजागरव्रतोद्यापनंकरिष्ये तत्रा

6

दाचाचार्यवरणादिविधानं कृत्वा गणेशपूजादिमण्डलपूजान्तं विधाय ततो लक्ष्मी
पूजनमिन्द्रपूजनं च विधाय परितो दीपान्घृतेन तिलतैलेन लक्षमयुतं सहस्रं तद
र्धं शतं वा दीपान्यथाशक्ति वीथीषु चत्वरेषु देवालयेषु वा प्रज्वाल्य नारिकेलोदकं प्राशयन्नक्षै
र्दीव्येत् एवं रात्रिमुत्सवेन नीत्वा प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात् प्रधाने लक्ष्मीमिन्द्रं
च प्रत्येकं सहस्रसंख्याहुतिभिः ब्रह्मादिदेवताग्रहान्लोकपालांश्चैकैकयाहुत्या य
थाशक्ति हुत्वा आचार्यं संपूज्य सौवर्णेन राजतेन वा दीपं सुवर्णवर्तिसहितं सदक्षिणं
दत्वा प्रतिमामप्याचार्याय दत्वा घृतशर्करादिना ब्राह्मणान्संतर्प्य तेभ्यो दक्षिणां
दत्वा आशिषो गृहीत्वा शय्यादिकं यथाशक्ति दत्वा भूयसीं दक्षिणां दत्वेष्टजनैः स
ह भुञ्जीत इति कोजागरव्रतोद्यापनं अथाश्वयुज्यां गजनीराजनं कार्यं तत्र वाजि
नीराजनवदिति संप्रदायात् अथाश्विनपौर्णमास्यां नारदीयपुराणे दानमुक्तं मात्स्ये

श्रा॰ पं॰ ८

पंचविंशतिसाहस्रं नारदीयमथोच्यते तदेषपंचदशपांतद्दद्याद्धेनूंनामसमकाविंत
श्रद्दधाद्द्विजवर्याय स लभेन्मोक्षमेव चेति तुलसंक्रांतौ वामनपुराणदानं नारदी
ये एवं परंपराश्रामे पुराणं वामनं शुभे लिखित्वैतत्पुराणं तु यः शरद्विषुवेर्पयेत् वि
प्राय वेदविदुषे हूतः येत्र समविंत सत्क्ष…हूस्ननरकान्सितन्स्वर्गं नयेत्सकान् दे
हांते भुक्तभोगो सौ याति विष्णोः परं पदम् इति नारदीयवामनपुराणयोर्दानं इ
ति आश्विनपूर्णिमायां शारत्पूर्णिमाकृत्यं समाप्तम् ॥

7

[illegible]

ल. पू. १

ॐ श्रीगणेशाय नमः अथ महालक्ष्मीपूजा तत्र ब्राह्मे मुहूर्ते उत्थाय स्वगुरुस्म
रणं कुंडलिनीस्मरणादि प्रातःकृत्यादिकं कृत्वा दंतधावनस्नानसंध्यानित्यत
र्पणादि कृत्वा मूलेन प्राणायामं कृत्वा गणपतिकुलदेवतादिस्मरणं तत्र ब्राह्म
णादीन्नमस्कृत्य ॐ सुमुखश्चैकदंतश्च· शुक्लांबरधरं विष्णुं· अभीप्सितार्थसि
द्ध्यै· यत्र योगेश्वरः कृष्णो· अनन्याश्चिंतयंतो मां· स्मृतेः सकलकल्याणभाजनं·
सर्वेषारंभकार्येषु नास्ति तेषाममंगलं· येषां हृदिस्थो हरिः तदेव लग्नं सुदिनं तदेव
ताराबलं चंद्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि इति
मंगलाचरणं अद्यास्मिन्मासे श्रीमहाकाली महालक्ष्मी महासरस्वती प्रीतिपूर्वक
दुरितनिवारणार्थं मम सर्वापुत्रारोग्यैश्वर्यादिवृद्धिकामः श्रीमहालक्ष्म्याः षोडशो
पचारपूजां श्रीसूक्तपाठानां यथोक्तसंख्यायाम् दशांशहोमादिकं च करिष्ये इति संक

स्य तत्रनिर्विघ्नार्थंगणपतिपूजनंकरिष्ये ततोरक्ताक्षतादिभिर्भ्रमावष्टदल।
पीठं तत्रमहागणपतयेसिद्धिबुद्धिसहितसवाहनसाङ्गसपरिवारायेह्येहिआगच्छा
गच्छ हेरंबत्वमभ्येह्यंबिकात्र्यंबकात्मजसिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितःपितः ना
गास्यनागहारत्वंगणराजचतुर्भुज भूषितःस्वायुधैर्दिव्यैःपाशाङ्कुशपरश्वधैः आवाहये
त्वांपूजार्थंरक्षार्थंचममप्रभो रहागत्यगृहाणत्वंपूजांकर्तुंचरस्वमे आवाहैवंगणेशाने
पूजाद्रव्यैःप्रपूजयेत् गणानांत्वागणपतिंहवामहे कविंकवीणाम्· आवाहनं
स्वागतं पाद्यं अर्घ्यं आचमनीयं मधुपर्कंपुनराचमनीयं स्नानंवस्त्राभरणानिगंधंपुष्पं
धूपंदीपंनैवेद्यंताम्बूलं दक्षिणा नमस्कारान्विधाय हस्तद्वयेननारिकेलाद्यर्घ्यपा
त्रस्थजलंसपुष्पंगृहीत्वोत्थायप्रार्थयेत् रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक भक्ताना
मभयंकर्तात्राताभवभवार्णवात् द्वैमातुरकृपासिन्धोषाण्मातुराग्रजप्रभो वरदस्त्वंव

ल· पू· २

2

रंदेहि वांछितं वांछितार्थदं अनेन फलदानेन फलदोस्तु भवान्मम इति फलं दत्वा
प्रार्थयेत् विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय ना
गाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते भक्तार्तिनाश
नपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय विद्याधराय विकटाय वामना
य भक्तिप्रसन्नवरदाय नमो नमस्ते नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः विश्वरूप
स्वरूपाय नमस्ते ब्रह्मचारिणे भक्तिप्रियाय देवाय नमस्तुभ्यं विनायक इति नमस्कृ
त्य त्वां शत्रुवर्गदलनेति च सत्प्रदेति भक्तिप्रियेति सुखदेति बलप्रदेति विद्याप्रदेत्य
घहरेति च ये स्तुवंति तेभ्यो गणेश वरदो भव नित्यमेव इति स्तवनाप्रणमेत् ततो स्वस्ति
ग्वरणादि यवारोपं च विधाय कलशस्थापनं महीद्यौः भूमिस्पर्शः स्योना पृथिवी
भूमिप्रार्थना ओषधयः सं वदंती इति यवान्संस्थाप्य कलशं निधाय वरुणस्योत्तंभ

नमस्तीति जलप्रक्षेपः ओषधयः संवदन्तेति सर्वौषधिः स्योना पृथिवीति सप्तमृ
दः अश्वत्थे वो निषदनमिति पंचपल्लवाः कांडात्कांडात्प्ररोहन्तीति दूर्वा याः फ
लिनीर्या अफला इति फलानि तत्त्वा परिवाजपतीति पंचरत्नप्रक्षेपः हिरण्यगर्भः
समवर्तताग्रे इति दक्षिणाद्रव्ये युवा सुवासाः इति वस्त्रेणाच्छाद्य रक्तवस्त्रेण सूत्रेण
च वेष्टने तत्त्वायामि ब्रह्मणा ब्रह्म इति वरुणावाहनं ब्रह्माण्डोदरतीर्थानि करैः स्पृ
ष्टानि ते रवे क्षौमि संक्रुश समुद्रयानि तीर्थान्यावाह्य गंगे च यमुने चैव सर्वे समुद्राः सरि
ताः इत्यावाह्य वेदनादिभिः कलशमलंकृत्य कलशस्य मुखे विष्णुः त्वत्प्रसादात् इ
मं यज्ञे सान्निध्यं प्रसन्नो भव सर्वदा इति कलशस्थापनं ततो मूलेन प्राणायामत्रयं।
कृत्वा श्रीसूक्तन्यासं कुर्यात् अस्य श्रीसूक्तस्यानंदकर्दमचिक्लीतश्रीपुत्रेभ्यो ऋषिः।
भ्यो नमः शिरसि मुखे अनुष्टुब्बृहतीत्रिष्टुप्प्रस्तारपंक्तिश्छन्दोभ्यो नमो हृदि श्री

ल. सू. ३

विभावसुर्देवताभ्यांनमः ममसमृद्धंवस्यमैश्वर्यारोग्यापुत्रस्थैर्याभिवृद्धयेविनियो
गः इतिकृतांजलिःकृत्वा हिरण्यायैनमः हृदयायनमः चंद्रायैनमः शिरसेस्वाहा रज
तस्रजायैशिखायैवषट् हिरण्यस्रजायैकवचायहुं हिरण्मय्यायैनमः नेत्रत्रयायवौषट्
हिरण्यायैनमः अस्त्रायफट् एवंकरांगुलिन्यासोपि शिरसिहिरण्यवर्णां १ नेत्रयोः
तांमआवह २ कर्णयोः अश्वपूर्वां ३ नासिकायांकांसोस्मितां ४ मुखेचंद्रांप्रभासां ५
गलेआदित्यवर्णे ६ बाह्वोःउपैतुमां ७ हृदिक्षुत्पिपासां ८ नाभौगंधद्वारां ९ गुह्ये
मनसःकामं १० गुदेकर्दमेन ११ ऊर्वोःआपःसृजंतु १२ जान्वोःआर्द्रांपुष्टीं १३ जंघयोः
आर्द्रांयष्टीं १४ पादयोःतांमआवह १५ ततः श्रां श्रीं श्रूं श्रैं श्रौं श्रः इत्येवंषडंगानिविन्य
स्य आरक्तरौरवोर्ध्वकमलेदेवींध्यायेत् अरुणकमलसंस्थातद्रजःपुंजवर्णांकरकमल
धृतेष्टाभीतियुग्मांबुजाच मणिमुकुटविचित्रालंकृताकल्पजालैर्भवतुभवनमातानासर्वं

लक्षणाभोनयेनस्वाङ्गेनीयानैलवर्जिते विनायकस्य प्रतिमां वस्त्रयुग्मसम
न्वितां दद्याद्विप्राय विद्वेषमर्वे विघ्नोपशान्तये एवं कृते पर्मेरान विघ्ननाथस्य।
पूजने विनयत्ते भवेच्छ्रेनैस्यन्मस्तंमयोदिते वैस्तवाधास्मदीतास्य स्त्रादेशपूजो।
गणाधिपः तस्मिन्संपूजिते विस्तरीशोमावयधारमा हव्यवाहगुणदेवाः पू
जिताः सर्वे न संशयः वेदिकाधामान्हगणाः परितुष्टा भवन्तिते तस्मिन्संपूजिते वि
प्राः भक्त्या सिद्धिविनायके यइदंशृणुयान्नित्यं श्रावयेद्वा समाहितः सिध्यन्ति
सर्वकार्याणि सिद्धिदस्य प्रसादतः इति सिद्धिविनायकव्रतपूजा समाप्तम्

द्वाश्रीश्रियैनमः इतिध्यात्वामानसोपचारैराराध्यअर्घ्यादिस्थापनांते ॐह्रींश्रींहंसःसो
हंस्वाहा इतिमंत्रेणात्मरक्षांविधाय पीठपूजामारभेत् ॐमंडूकायनमः कालाग्निरु
द्रायनमः मूलप्रकृत्यैनमः आधारशक्त्यैनमः कूर्मायनमः अनंतायनमः वराहायनमः
पृथिव्यै· सुधासमुद्राय· श्वेतद्वीपाय· स्वर्णपर्वताय· नंदनोद्यानाय· कल्पवृक्षवनाय·
स्वर्णप्राकाराय· करुणामयपरिखायै· स्वर्णमंडपाय· पूर्वद्वारश्रियै· इंद्राय· ब्रह्मणे·
सत्वाय· ऋग्वेदाय· आत्मनेकालतत्वाय· अंबिकायै· इंद्राण्यै· वेदमात्रे· शैलपुत्र्यै· ब्र
ह्मचारिण्यै· चंद्रघंटाय· कूष्मांडायै· कात्यायिन्यै· महागौर्यै· १ ततोदक्षिणद्वारे द्वार
श्रियैनमः तमाय· धांसै· सिद्धायै· तमायै· विष्णवे· यजुर्वेदाय· रजसे· विद्यातत्वाय
जगन्मात्रे· मायायै· शिवायै· धांसै· ह्रींकारायै· क्लींकारायै· मायाशक्त्यै· वीरायै· प्रवी
रायै· अनंतरात्मने· दंडधराय· २ ततःपश्चिमद्वारे द्वारश्रियै· वरुणाय· रुद्राय· सामवे

ल· सु·
४

दाय· आदित्याय· वारुण्यै· शंखायुधायै· हंसवाहिन्यै जगज्जीवायै· जगद्धीनायै· षो
डशकलायै· एणीकलशाय· चित्रिण्यै· चित्रमालायै· चित्रायै· चाङ्गायै· ३ ततऽन्तर
द्वारे द्वारश्रियै· कपालधारिण्यै· भक्तवत्सलायै· ह्रूंकारायै· नांकारायै· विमलरूपायै·
ईशानायै· पार्वत्यै· ब्रह्मण्यै· अथर्वणवेदाय पीठे· ज्योत्स्नायै· कल्याण्यै· शाकंभर्यै· चं
द्रकलायै· चंद्रवदनायै विभूत्यै· परविभूत्यै· भस्मधारिण्यै· पावनायै· गंगायै· भगीर
थ्यै· गोदावर्यै· प्रवरायै· प्रणतायै· ह्रींकारायै· क्रींकारायै· क्रौंकारायै· सर्वबीजात्म
ने बीजप्रवाहिन्यै· ४ मध्ये रत्नवेदिकायै· रत्नसिंहासनाय धर्माय· ज्ञानाय· वैराग्याय·
ऐश्वर्याय· अधर्माय· अज्ञानाय· अनैश्वर्याय· अवैराग्याय· श्वेतछत्राय· विलक्ष्म्यै· मा
याशक्त्यै· आनंदकंदाय· संविन्नालाय प्रकृतिमयपत्रेभ्यो· विकृतिमयकेसरेभ्यो· पंचा
शद्वर्णबीजायै· सर्वतत्वरूपायै· कर्णिकायै· अं अर्कमंडलाय· मं वह्निमंडलाय· सं सो

मं मंडलाय· सं सत्वाय· रं रजसे· तं तमसे· आं आत्मने· अं अंतरात्मने· पं परमात्मने·
ह्रीं ज्ञानात्मने· आत्मतत्वाय· मायातत्वाय· विद्यातत्वाय· कलातत्वाय· परतत्वाय·
इति संपूज्य केसरेषु पूर्वादिषु दिक्षु मध्ये च ओं भूत्यै· उन्नत्यै· कांत्यै· सृष्ट्यै· कीर्त्यै· सन्नत्यै·
व्याप्त्यै· उत्कृष्ट्यै· मत्यै· ऋद्ध्यै नमः इति संपूज्य ओं श्रीसर्वशक्तिकमलासनाय नमः इति
समस्तपीठं संपूज्य मूलमंत्रार्थं श्रीलक्ष्मीमूर्तिं परिकल्पयामि नमः इति कलशोपरि मू
र्तिं परिकल्प्य चेत्तां मंत्रकरो लक्ष्मीदुर्गा देवीं अवस्थितां ध्यापयामि महादेवीं सर्वसौभा
ग्यदायिनीं इति संध्याय स्वहृत्कमले श्रीमहादेवीं ध्यात्वा देव्यास्तेजो दीपाद्दीपांतरमिव
वहन्नासापुटात्पुनात्पुष्पांजलावानीय एह्येहि देवदेवेशि परिवारसमन्विते यावत्त्वां
पूजयिष्यामि तावत्त्वं चरहावह महापद्मवनांतस्थे कारणानंदविग्रहे सर्वभूतहिते मा
तरेह्येहि परमेश्वरि इत्यावाहनादिदशमुद्राः प्रदर्श्य ध्यायेत् लक्ष्मीं नीरजमुद्राजनन

ल. यां श्रीरंगधामेश्वरी दासीभूतसमस्तदेवनिकरां लोकैकदीपांकुरां श्रीमन्मंदकटाक्ष
स. विभ्रमलसद्ब्रह्मेंद्रगंगाधरां त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मुकुंदप्रियां ॥ इति ध्यात्वा
५ मूलमंत्रेणादीपिन्यामालिन्याचोदकेन च त्रिवारं प्रोक्षयित्वा प्राणप्रतिष्ठां विधाय पु
ष्पांजलिं गृहीत्वा ॐ ह्रीं ह्रौं कात्यायनी देवि विष्णोर्भवविशंकरप्रिये भक्त्या मया कृतां पूजां गृह्ण
ण त्वं सुरेश्वरि हिरण्यवर्णां· जातवेदसे· नमो देव्यै महालक्ष्म्यै· आवाहनं परिकल्पयामि
इति दद्यात् तप्तकांचनवर्णाभं मुक्तामणिविराजितं अमलं कमलं दिव्यमासनं प्रतिगृ
ह्यतां तां म आवह २ जातवेदसे· नमो देव्यै· महासरस्वत्यै· श्रीरेतत्तेस्त्वासनं नमः ॐ स्वा
गतं कुशलं पृच्छे महादेवि महेश्वरि स्वागतं त्वया भद्रे कृपया भक्तवत्सले तां म आव
ह· २ जातवेदसे· नमो देव्यै· महासरस्वत्यै· श्रीरेतत्ते स्वागतं नमः गंगादितीर्थसंभूतं गं
धपुष्पाक्षतैर्युतं पाद्यं ददाम्यहं तुभ्यं नमस्ते कमलालये अश्वपूर्णां २ जातवेदसे· न

मोदेव्यै· श्रीरत्नतेपाद्यंनमः गन्धरंयवसमायुक्तंस्वर्णपात्रेप्रपूजितं अर्घ्यंददाम्यहं
तभ्यंप्रसीदत्वंसुरेश्वरि कांसोस्मितां· जातवेदसे· नमोदेव्यै· लोकमात्रे· श्रीरत्नतेऽर्घ्यं
स्वाहा सर्वलोकस्ययामातायामातालोकपावनी ददाम्याचमनंतस्यैमहालक्ष्म्यैप्रयत्न
तः चंद्रांप्रभासां· जातवेदसे· भक्तप्रियायै· श्रीरत्नतेआचमनीयंस्वधा कपिलादधि
क्षीरंदंडयवलेमधुसंयुतं स्वर्णपात्रस्थितंदेविमधुपर्कंगृहाणमे आदित्यवर्णे १ जातवेद
से· नमोदेव्यै· भक्तप्रियायै· श्रीरत्नतेस्नानीयंनमः पेहिपादुकयादेविस्नानार्थंस्ना
नमंडपं स्नानवारिगृहाणत्वंस्नानासनसमागता सुगंधितैलगंधादिपंचामृतजला।
दिकं सुगंधिस्नानचूर्णंचवतयोद्वर्तनकादिकं नानातीर्थोद्भवंतोयंस्नानीयंचगृहाण
मे आदित्यवर्णे· जातवेदसे· नमोदेव्यै· भक्तप्रियायै· श्रीरत्नतेस्नानीयंनमः आपो।
हिष्ठेतिमलापकर्षणस्नानं पयोदधिघृतंचैवशर्करामधुसंयुतं पंचामृतंमयानीतं।

ल· ह· ५ गृहाणपरमेश्वरि आदित्यवर्णे ४ जातवेदसे · भद्रायैनमः श्रीरत्नेपंचामृतस्ना
नं पुरुषसूक्तेनशुद्धोदकेनस्नानं जातवेदसे · पुनराचमनं दिव्यांबरंनव्यंतंक्षौम
वातिमनोहरं त्रैलोक्यजननीदेवीदीयमानंगृहाणमे उपैतमां · जातवेदसे · नमो
दैव्यै · श्रीलक्ष्म्यैनमः श्रीरत्नेवासोयुग्मंनमः येहिदेवि विभूषार्थं नैपथ्यागारमुत्तमं
6 विभूषासनमास्थायतथादर्शंविलोकय केशप्रसाधनंकृत्वा भूषणान्यंगसंगमाक्रमा
रत्नकंकणवैडूर्यमुक्ताहारादिकानिच सूत्रमंजीरमदालस्यभूषणानिगृहाणमे ह
रिप्रिया · ४ नमोदेव्यै · जातवेदसे · हिरण्यायै · श्रीरत्नानिविभूषणानिनमः येहिदे
विनिजस्थानेसिंहासनमनुत्तमं सुनावकंसमास्थायगंधंदिव्यंगृहाणमे चंदनागुरुक
र्पूरकुंकुमाद्यैःसमन्वितैः कस्तूरीरोचनायुक्तंगंधंदेविगृहाणमे गंधद्वारां ४ जातवेद
से · नमोदेव्यै · महादेव्यै · श्रीरत्नेगंधोनमः पुष्पमुक्ताफलैरेतैरक्षतैःशालिसंभवैः

सर्वौषधिये महालक्ष्मि घोतयामि स्वभक्तितः जातवेदसे· नमो देव्यै· श्रीरेतान्यक्ष
तताः हरिद्रां च मयानीतां देवि कल्याणदायिनि सौभाग्यं वर्द्धितां नित्यं गृहाण ह
रिवल्लभे जातवेदसे· नमो देव्यै· हरिप्रियायै नमः श्रीरेतते हारिद्रं ॐ ॐ मे शोभ
ने दिव्ये सर्वदा मंगलप्रदे मयानीतं महादेवि विघ्नं दास्यामि सेदरि जातवेदसे· न
मो देव्यै· मंगलायै नमः श्रीरेतते ॐ ॐ मे नमः सिंदूरं शुभदे नित्यं महाशक्ति प्रियं
सदा प्रयच्छामि महादेवि सर्वसौभाग्यदायिनि जातवेदसे· नमो देव्यै· महादेव्यै·
श्रीरेतने सिंदूरं नमः मालतीमल्लिकादीनि नानाकुसुमानि च एकनाथे प्रयच्छा
मि पुष्पाणि शतिगृह्यतां मनसः कामं ए जातवेदसे· नमो देव्यै· एकनाथायै श्रीरे
तानि पुष्पाणि वौषट् रक्तैः श्वेतैर्व्रजैः पुष्पैर्मल्लिकादिविचित्रैः नानापुष्पैः कृ
तां मालां गृहाण हरिवल्लभे श्रीरेतां मालां समर्पयामि पुष्पमालां नमः सुगंधं शी

ल॰
सू॰
८

तलेखुर्ध्वेनानागंधसमन्वितं श्रीमर्थंतवदेवेशिमहर्ण्यांप्रतिशृह्यतां जातवेदसे॰ न
मोदेव्यै॰ सुभगायैनमः श्रीरितनेपरिमह्लदव्यैनमः गृह्यागहना चंचलायैनमः पा
दौपूजयामि चपलायैनमः गुल्फौपू॰ कांत्यैनमः जानुनीपूजयामि मंगलायैनमः
जंघेपू॰ कमलिन्यैनमः कटिंपू॰ शिवायैनमः नाभिंपूजया॰ क्षमायैनमः उदरंपू
जया॰ गौर्य्यैनमः सिंहवाहिन्यैनमः स्तनद्वयेपूज॰ स्कंदमात्रेनमः काममात्रे
नमः भुजद्वयंपूजयामि कंबुकंठायैनमः कंठंपूजया॰ सरस्वत्यैनमः मुखं॰
पूजयामि सुवासिन्यैनमः नासिकांपूजयाति स्वर्णकुंडलायैनमः कर्णद्वयं॰
पूजयामि चंडिकायैनमः नेत्रद्वयंपूजयामि शिवायैनमः ललाटंपूजयामि कु
मार्य्यैनमः शिरःपूजयामि सर्वरूपायैनमः सर्वांगंपूजयामि इतिसंपूज्य ततोः
ष्टोत्तरशतनामभिःपूजयेत् ॥ ॐअस्यश्रीमहालक्ष्म्यष्टोत्तरशतनाममालामंत्रस्य

ब्रह्मा ऋषिरनुष्टुप्छंदः श्रीमहालक्ष्मीर्देवता श्रीमहालक्ष्मीप्रीत्यर्थं श्रीमहालक्ष्मी
महोत्तरशतनामभिः पूजने जपे विनियोगः ततः श्रींबीजषट्केन षडंगन्यासं कुर्यात्
लक्ष्मीं क्षीरसमुद्रराजतनयामित्यादिध्यात्वा पुष्परक्तैर्वा पूजयेत् तद्यथा ॐ महाल
क्ष्म्यै नमः महाकाल्यै नमः महासरस्वत्यै· महाकायै· महागौर्यै· महादेव्यै· भक्तानुग्र
हकारिण्यै· स्वप्रकाशात्मरूपायै· महामायायै· माहेश्वर्यै· वागीश्वर्यै· जगद्धात्र्यै· का
लरात्र्यै· त्रिलोचनायै· भद्रकाल्यै· कपालिन्यै· महागौर्यै· त्रिलोकात्मिकायै· सिद्धल
क्ष्म्यै· क्रियालक्ष्म्यै· लोकमन्त्रप्रदायिन्यै· ब्रह्मरूपायै· स्वरूपायै· विश्वरूपिण्यै· पंचभूतात्मि
कायै· देवमात्रे· सुरेश्वर्यै· दारिद्र्यध्वंसिन्यै· वीणापुस्तकधारिण्यै· सर्वशक्त्यै· ब्रह्मात्मि
कायै· षडंगरूपिण्यै· नवदुर्गात्मिकायै· शुभ्रभैरव्यै· गंगायै· शारदायै· वेण्यै· सर्वशा
स्त्रधारिण्यै· समुद्रवसनायै· ब्रह्माण्डमणिमेखलायै· अवस्थात्रयनिर्मुक्तायै· गुणत्रयवि

ल॰ सू॰ ८

8

वर्णितायै · योगध्यानैकसंन्यासिन्यै · योगध्यानैकपरायणायै · देवत्रयविशोकायै · वेदां
तज्ञानरूपिण्यै · पद्मावत्यै · विज्ञानलक्ष्म्यै · नागयज्ञोपवीतिन्यै · सूर्यचन्द्राग्निभासायै · ग्रहन
क्षत्ररूपिण्यै · वेदिकायै · वेदरूपिण्यै · गिरिसंभवायै · कैवल्यदायै · विशृंखलायै · सूर्यमंडल
संस्थितायै · सोममंडलमध्यस्थायै · वायुमंडलसंस्थितायै · वह्निमंडलसंस्थितायै · वह्निका
यै · चक्रमध्यस्थितायै · चक्रमार्गप्रदायिन्यै · सिद्धान्तमार्गदायिन्यै · षड्वर्गवर्जितायै · प्रत्यक्षा
दिग्भागावृतायै · विद्यामूर्त्यै · त्रैलोक्यमोहिन्यै · विद्यायै · धर्मदायै · रक्तायै · ब्रह्मस्थापित
रूपायै · कैवल्यज्ञानगोचरायै · करुणायै · वरुणायै · मधुकैटभमर्दिन्यै · अचिंत्यलक्षणायै ·
गोप्त्र्यै · सदाभक्ताघनाशिन्यै · महारमायै · परमैश्वर्यै · श्रीसिद्धलक्ष्म्यै महाकालिन्यै · सद्यो
जातायै · वामदेवायै · अघोरायै · तत्पुरुषायै · ईशानरूपिण्यै · एकाक्षरदेव्यै · योगिन्यै ·
योगध्यानपराक्रमायै · श्रीसिद्धलक्ष्म्यै · श्रियै · कमलायै · कमलालयायै · पद्मायै · न

लिनयुग्मकरांबुजायै॰ शैलपुत्र्यै॰ ब्रह्मचारिण्यै॰ चंद्रघंटायै॰ कूष्मांडायै॰ स्कंदमात्रे॰ का
त्यायिन्यै॰ कालरात्र्यै॰ महागौर्यै॰ सिद्धिदायै॰ सर्वात्मिकायैनमः इतिसंपूज्य कालि
कायां ओंह्रांहृदयायनमः ओंह्रींशिरसेस्वाहा ओंह्रूंशिखायैवषट् ओंह्रैंकवचायहुं ओंह्रौंनेत्रत्रया
यवौषट् ओंह्रः अस्त्रायफट् ततोष्टदलेषुपूर्वादिक्रमतः पद्मासनायैनमः पद्मवर्णायै॰
पद्मसंस्थायै॰ आर्द्रायै॰ तर्पयंत्यै॰ तुष्टायै॰ ज्वलिन्यै॰ स्वर्णप्रकारायैनमः ततोदलाग्रेषु
ब्राह्म्यै॰ माहेश्वर्यै॰ कौमार्यै॰ वैष्णव्यै॰ वाराह्यै॰ इंद्राण्यै॰ चामुंडायै॰ महालक्ष्म्यै॰ ततोभूपुरे
पूर्वादिक्रमेण इंद्रायसायुधायसपरिवारायसशक्तियुतायनमः एवं अग्नये यमाय
नैर्ऋतये वरुणायवायवे॰ कुबेराय॰ ईशानाय॰ ब्रह्मणे॰ अनंतायनमः ततः वज्राय
नमः शक्त्यैनमः दंडायनमः खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰ शूलाय॰ पद्माय॰ चक्रा
य॰ इतिसंपूज्य पुष्पांजलिंदत्वा दशांगंगुग्गुलंधूपंचंदनागुरुसंयुतं भक्त्यादत्तंमयादेवि

ल॰ पू॰ ८

प्रसीदत्वं महेश्वरि कर्दमेन ॥ जातवेदसे॰ नमो देव्यै॰ भद्रकाल्यै॰ श्रीरत्नेषु धूपो नमः कर्पू
रवर्त्तिसंयुक्तं गोघृतेन समन्वितं दीपं गृहाण देवेशि महालक्ष्मि नमोऽस्तु ते आपः सृजन्तु १२
जातवेदसे॰ नमो देव्यै॰ श्रीमहालक्ष्म्यै नमः श्रीरत्नेषु दीपो नमः नैवेद्यं गृह्यतां देवि भक्ष्य
भोज्यसमन्वितं षड्रसैरन्वितं दिव्यं घृतेन परिशोधितं आर्द्रां पुष्करिणीं सूर्यां १३ जातवेदसे
नमो देव्यै॰ हरिणमालिन्यै॰ श्रीरत्नेषु नैवेद्यं नमः मध्ये पानीयं उत्तरापोशानं पुनराचमनीयं
कर्पूरं चंदनोऽस्मि ग्रंथि दिव्यं गंधसमन्वितं करोद्वर्तनकं रम्यं गृहाण परमेश्वरि जातवेदसे॰
नमो देव्यै॰ पिंगलायै नमः श्रीरत्नेषु करोद्वर्तनकं नमः पूगीफलैः सकर्पूरैः नागवल्लीदलै
र्युतं कर्पूरचूर्णसहितं ताम्बूलं प्रतिगृह्यतां आर्द्रां॰ यष्टिं॰ चंद्रां १४ जातवेदसे॰ नमो देव्यै॰ पिंगला
यै नमः श्रीरत्नेषु ताम्बूलं नमः जातवेदसे॰ नमो देव्यै॰ देव्यै नमः श्रीरत्नेषु सुवर्णपुष्पं नमः
इदं फलं मया देवि स्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि जातवेदसे॰

नमोदेव्यै॰ सिद्धिदायैनमः श्रीरत्नेफलंनमः त्वंवेदत्रयीरत्नानिविघ्नदग्निस्त्वमेवहि
नीराजनंमयादत्तंगृहाणपरमेश्वरि नाम्न ग्रावाह॰ १९ जातवेदसे॰ नमोदेव्यै॰ यमुनादिनिवा
सिन्यैनमः श्रीरत्नेनीराजनंनमः गौरीमिमाय जातवेदसे॰ नमोदेव्यै॰ प्रणादेवी॰ सममंत्रा
श्रीसूक्तं नमोदेव्यै॰ महालक्ष्म्यै॰ महाकाल्यै॰ महालक्ष्म्यै॰ महासरस्वत्यै॰ श्रीरत्नेमंत्रपुष्पंन
मः सर्वस्वरूपे॰ जातवेदसे॰ नमोदेव्यै॰ महाकाल्यैनमः श्रीरत्नानिप्रदक्षिणानिनमः सर्व
नःपाणिपादंते॰ पञ्चभिःप्रयतस्मादिसमस्तं नमस्तेस्तुमहादेव्यैनमस्तेस्तुहरिप्रिये
नमस्तेस्तुजगद्धात्रिनमस्तेशिववल्लभे जातवेदसे॰ नमोदेव्यै॰ महामायायैनमः श्रीरत्ना
निवेदनानिनमः पद्मप्रिये॰ पद्मापद्मासनः यामायामश्वैकेरभप्रमथिनीमंपात्वविच्छे।
श्वरी जातवेदसे॰ नमोदेव्यै॰ श्रीरत्नेप्रार्थनानि ततःश्रीसूक्तः तेशीपाठः लक्ष्मीहृदयादि
कंपठित्वा गुह्यातिगुह्यगोप्त्रीत्वंस्मादिनाजपंसमर्पयेत् इतिश्रीलक्ष्मीपूजाविधानं

ल॰ सू॰ १२

अथश्रीसूक्तं ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो
मआवह १ तांमआवह जातवेदो लक्ष्मीमनपगामिनीं यस्यांहिरण्यंविंदेयंगामश्वंपुरुषा
नहं २ अश्वपूर्वांरथमध्यांहस्तिनादप्रमोदिनीं श्रियंदेवीमुपह्वये श्रीर्मांदेवीजुषतां ३ कांसो
स्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ४
चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां तांपद्मिनीमींशरणमहंप्रपद्ये अ
लक्ष्मीर्मेनश्यतांत्वांवृणोमि ५ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः
तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ६ उपैतुमांदेवसखःकीर्ति
श्चमणिनासह प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ७ क्षुत्पिपासामलांज्येष्ठामल
क्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ८ गंधद्वारांदुराधर्षांनित्यपुष्टां
करीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ९ कर्दमेनप्रजाभूतामयिसंभवकर्द

12

म श्रियंवासयमेकुलेमातरंपद्ममालिनीं ११ मनसःकाममाकूतिंवाचःसत्यमशीमहि
पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः १० आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृहे नि
चदेवीमातरंश्रियंवासयमेकुले १२ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीं सूर्यांहि
रण्मयींलक्ष्मींजातवेदोममावह १३ आर्द्रांपुष्करिणींयष्टिंपिंगलांपद्ममालिनीं चंद्रांहिर
ण्मयींलक्ष्मींजातवेदोममावह १४ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं यस्यांहिर
ण्यंप्रभूतंगावोदास्योऽश्वान्विंदेयंपुरुषानहं १५ इतिश्रीसूक्तं गौरीर्मिमायसलिलानितक्ष
त्येकपदीद्विपदीसाचतुष्पदीअष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् १६ प्र
णोदेवीसरस्वतीवाजेभिर्वाजिनीवती धीनामवित्र्यवतु १७ यःशुचिःप्रयतोभूत्वाजु
हुयादाज्यमन्वहं श्रियःपंचदशर्चंचश्रीकामःसततंजपेत् १८ पद्मासनेपद्मऊरुपद्मा
क्षिपद्मसंभवे तन्मेभजसिपद्माक्षियेनसौख्यंलभाम्यहं १९ अश्वदायीचगोदायीधनदायि

ल.
सू.
१३

13

महायते धनंमेन्नषन्तो देवी सर्वकामार्थसिद्धये २० पुत्रपौत्रं धनं धान्यं हस्त्यश्वाजगवे
रथं प्रजानां भवती माता आयुष्मन्तं करोतु मां २१ चंद्राभां लक्ष्मीनाथानां सूर्याभां श्रिय
मीश्वरीं चंद्रसूर्याग्निसर्वाभां महालक्ष्मीमुपास्महे २२ धनमग्निर्धनं वायुर्धनं सूर्यो धनं
वसुः धनमिंद्रो बृहस्पतिर्वरुणो धनमश्नुते २३ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा सो
मं धनस्य सोमिनो मह्यं ददातु सोमिनी २४ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः भवंति
कृतपुण्यानां श्रीसूक्तं जपतां सदा २५ वर्षंतु ते विभावरि दिवो अभ्रस्य विद्युतः रोहंतु सर्व
बीजान्यव ब्रह्मद्विषो जहि २६ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि वि
श्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व २७ या सा पद्मासनस्था विपुलकटितटी
पद्मपत्रायताक्षी गंभीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणि
गणखचितैः स्नापिता हेमकुंभैर्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता २८ ल

ल्मींक्षीरसमुद्रराजतनयांश्रीरंगधामेश्वरींदासीभूतसमस्तलोकवनितांलोकैकदीपांकुरां
श्रीमन्मंदकटाक्षलब्धविभवांब्रह्मेंद्रगंगाधरांत्वांत्रैलोक्यकुटुंबिनींसरसिजांवंदेमुकुंदप्रि
यां २९ सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीसरस्वती श्रीलक्ष्मीर्वरलक्ष्मीश्चप्रसन्नाममसर्वदा ३०
धणमांविविशेषुकरत्नशोभितोपद्मासनेनात्रगणपयोधरान्विता इंदीवराक्षीमखिलसारमंजरी
सुभांदयानोवसुदांभजामहे ३१ श्रियेजातःश्रियआनिर्यायःश्रियंवयोजरितृभ्योददाति
श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ श्रियएवैनंतच्छ्रियामादधाति संतत
मृचावषट्कृत्यंसंततंसंधीयतेप्रजयापशुभिर्यएवंवेद ३२ पुनगौरीमिमायःप्रणोदेवी ३५
यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं ३३ मं
त्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वरि यत्पूजितंमयादेविपरिपूर्णंतदस्तुमे इतिश्रीसूक्तकण
ठः सरसिजनयनेसरोजहस्तेधवलतरांशुकगंधमाल्यशोभे भगवतिहरिवल्लभेप्रसीदत्रि

ल. भुवनभूतिकरीप्रसीदमह्यं १८ सौवर्णीपद्मपद्मामलकमलहस्तेशुभ्रमशःपाणिशुभ्रे विश्वे
हृ. तीशोभयोग्राहितजलधिजलोछ्रगाशीविधात्री वाङ्गहेहवराभयाङ्कितदयाभक्तिप्रियोला
१४ सिनो लक्ष्मीर्मेभवतेवमनत्रादिनेवेद्माहिरण्मयापि १९ ॥ ॥ ॐ ॥ ॐ

कर्म [illegible]

८३